—श्लोक 7, सर्ग 36, अ. का.;

53. राज्यं गतधनं साधो पीतमण्डां सुरामिव।
निरास्वाद्यतमं शून्यं भरतो नाभिपत्स्यते।।
—श्लोक 12, सर्ग 36, अ. का.;

54. आगतस्त्वंमिमं देशं कथं राक्षससेवितम्।[54]

55. अंजलि कुर्मि कैकेयि पादौ चापि स्पृशामि ते।
शरणं भव रामस्य माधर्मो मामिहि स्पृशेत्।।36।।
—श्लोक 36, सर्ग 12, अ. का.;

56. अतिप्रवृत्ते दुर्मेधे कैकयि कुलपांसनि।
—श्लोक 22, सर्ग 37, अ. का.;

57. भवत्वधर्मो धर्मो वा सत्यं वा यदि वानृतम्।
यत्त्वया संश्रुतं मह्यं तस्य नास्ति व्यतिक्रमः।।46।।
—श्लोक 46, सर्ग 12, अ. का.;

58. शैब्यः श्येनकपोतीये स्वमांसं पक्षिणे ददौ।
अलर्कश्चक्षुषी दत्त्वा जगाम गतिमुत्तमाम्।।43।।
—श्लोक 43, सर्ग 12, अ. का.;

59. अहं हि विषमद्यैव पीत्वा बहु तवाग्रतः।
पश्यतस्ते मरिष्यामि रामो यद्यभिषिच्यते।।47।।
—श्लोक 47, सर्ग 12, अ. का.;

60. भरतेनात्मना चाहं शपे ते मनुजाधिप।
यथा नान्येन तुष्येवमृते रामविवासनात्।।49।।
—श्लोक 49, सर्ग 12, अ. का.;

61. प्राप्य वर्षसहस्राणि बहून्यायूंषि जीवतः।
जीर्णस्यास्य शरीरस्य विश्रान्तिमभिरोचये।।8।।
—श्लोक 8, सर्ग 2, अ. का.;

62. अनेकवर्षसाहस्रों वृद्धस्त्वमसि पार्थिव।
स रामं युवराजमभिषिंचस्व पार्थिवम्।।21।।
—श्लोक 21, सर्ग 2, अ. का.;

63. यदा वक्तुं स्वयं दैन्यान्न शशाक महीपतिः।
तदा सुमन्त्रं मन्त्रज्ञा कैकेयी प्रत्युवाच ह।।61।।
—श्लोक 61, सर्ग 14, अ. का.;

64. न चास्था मुख वर्णस्य लक्ष्यते विक्रिया तदा।

65. न गन्तव्यं वनं देव्या सीतया शीलवर्जिते।
अनुष्ठास्यति रामस्य सीता प्रकृतमासनम्।23।।
—श्लोक 23, सर्ग 37, अ. का.;

॥ शैवाणेशाय नमः ॥

docteur philippe vouin

secteur psychiatrie-adultes lozère-est

48120 saint alban sur limagnole

कार्तिकवदिदशम्याम्,
रविवासरे, वै० २०५७

प्रेष्ठ गुरुदेव !

पिप्पलपत्रोपर्यालिखितं सुरुचिरं श्रीगणेशचित्रं कार्तिकवदितृतीयायां समधिगतम्, यद्विषये - वरिष्ठ मित्र ! - हृदयस्था मे कृतज्ञता प्रकटितव्या भवति मुहुर्मुहुः । सदा पत्राणि ते क्रियावन्ति व्रणौषधानीव मनसि फलं साधयन्ति, तेषाञ्च महत्यध्यापनात्मिका शक्तिर्नानाविधेषु विषयेषु (पारिवारिकेष्वाध्यात्मिकेषु च प्राधान्यतः) सर्वदा विराजते । (अनुशोचामि केवलम्, यत्त्वया शब्दीमन्दिराऽप्यनुक्तताली तन्त्रीवाद्योपरि विशेषतः किञ्चिदाशीर्वादात्मकं नेदानीमपि लिखितमभूत् - इति सरलोक्तिरियं क्षम्यताम् (अपि भवद्भिस्तस्य मत्प्रेषितं वर्णचित्रं कदाचिन्न समधिगम्यते स्म ?) । एवंवादिनो मत्तो बालिश्यं नास्ति । विचार्यतां कृपया, वाद्यमिदमिह संवादकभूतो ममास्ति, ततस्तस्योपस्थिति-र्महत्त्वपूर्णा लक्ष्यते । अन्यतत् सरस्वतीभवनरूपेण विभासते ।

यतस्त्वन्निर्दिष्टानुसारेण फ्रांस्देशीयमध्ययनं भारतेऽङ्गीक्रियते, ततः श्रीमद्वाचस्पतेः फ्रांस्देशीयविद्यालयप्रवेशनसम्भवं प्रति प्रक्ष्यामि । अस्मिन्नेव ग्रामे विद्यालय एकस्तिष्ठति, यो ब्रह्मवादिनीभिः सेर्-मरि-लुईस्-सुहृद्भिः संचाल्यते । किन्तु, मन्ये, पूर्वं फ्रांस्भाषाज्ञानमत्यावश्यकं भवति, मा तत्रत्यमध्ययनं फलविवर्जितं परीक्षाप्रवेशश्च प्रतिषिद्धो भविष्यतः । औपम्येन, ये वैदेशिकाः छात्राः फ्रांस्देशीयविश्वविद्यालयेष्वधीविषवो भवन्ति, तेषामेव फ्रांस्भाषाविषये काचित्प्रावेशिकी पूर्वपरीक्षानिवार्या साम्प्रतं प्रचाल्यते । इयं दिष्ट्या वाचस्पत्यर्थमिदानीं नास्ति । अपि तु तेनाध्ययनप्रमाणपत्रं प्राप्तुं शक्येत, यदि स्वीयं फ्रांस्भाषाज्ञानमपर्याप्तमभिज्ञायेत ? । अन्यत्, स तदा प्रौढभूतो यवीयोभिः कुमारैः सहाऽधीत्य कदाचित् कष्टमनुभवेद् ग्लानिं विहाय । प्रमाणं त्वम् । यदीच्छसि, तर्हि फ्रांस्भाषामूलानि वाचस्पतिमध्यापयितुं पूर्व-

docteur philippe vouin
secteur psychiatrie-adultes lozère-est
48120 saint alban sur limagnole

॥ रौद्राणेशाय नमः ॥

कार्तिकवदिदशम्याम्,
रविवासरे, वै० २०५७

प्रेष्ठ गुरुदेव !

पिप्पलपत्रोपर्यालिखितं सुरुचिरं श्रीगणेशचित्रं कार्तिकवदितृतीयायां समधिगतम्, यद्विषये – वरिष्ठ मित्र ! – हृदयस्था मे कृतज्ञता प्रकटितव्या भवति मुहुर्मुहुः। सदा पत्राणि ते क्रियावन्ति बलप्रणौषधानीव मनसि फलं साधयन्ति, तेषाञ्च महत्यध्यापनात्मिका शक्तिर्नानाविधेषु विषयेषु (पारिवारिकेष्वाध्यात्मिकेषु च प्राधान्यतः) सर्वदा विराजते। (अनुशोचामि केवलम्, यत्त्वया शारदीमन्दिरान्यनूक्ततालीतन्त्रीवाद्योपरि विशेषतः किञ्चिदाशीर्वादात्मकं नेदानीमपि लिखितमभूत् – इति सरलोक्तिरियं क्षम्यताम् (अपि भवद्भिस्तस्य मत्प्रेषितं वर्णचित्रं कदाचिन्न समधिगम्यते स्म ?)। एवंवादिनो मत्तो बालिश्यं नास्ति। विचार्यतां कृपया, वाद्यमिदमिह संवादकभूतो ममास्ति, ततस्तस्योपस्थितिर्महत्त्वपूर्णा लक्ष्यते। अन्यत्तत् सरस्वतीभवनरूपेण विभासते।

यतस्त्वन्निर्दिष्टानुसारेण फ्रॉंस्देशीयमध्ययनं भारतेऽङ्गीक्रियते, ततः श्रीमद्वाचस्पतेः फ्रॉंस्देशीयविद्यालयप्रवेशनसम्भवं प्रति प्रक्ष्यामि। अस्मिन्नेव ग्रामे विद्यालय एकस्तिष्ठति, यो ब्रह्मवादिनीभिः सेर्-मरि-लूईस्-सुहृद्भिः संचाल्यते। किन्तु, मन्ये, पूर्वं फ्रॉंस्भाषाज्ञानमत्यावश्यकं भवति, मा तत्रत्यमध्ययनं फलविवर्जितं परीक्षाप्रवेशश्च प्रतिषिद्धो भविष्यतः। औपम्येन, ये वैदेशिकाः छात्राः फ्रॉंस्देशीयविश्वविद्यालयेष्वधीविषवो भवन्ति, तेषामेव फ्रॉंस्भाषाविषये काचित्प्रावेशिकी पूर्वपरीक्षानिवार्या साम्प्रतं प्रचाल्यते। इयं दिष्ट्या वाचस्पत्यर्थमिदानीं नास्ति। अपि तु तेनाध्ययनप्रमाणपत्रं प्राप्तुं शक्येत, यदि स्वीयं फ्रॉंस्भाषाज्ञानमपर्याप्तमभिज्ञायेत ?। अन्यत्, स तदा प्रौकभूतो यवीयोभिः कुमारैः सहाऽधीत्य कदाचित् कष्टमनुभवेद् ग्लानिं विहाय। प्रमाणं त्वम्। यदीच्छसि, तर्हि फ्रॉंस्भाषामूलानि वाचस्पतिमध्यापयितुं पूर्व-

सौविध्यं प्रदर्शयिष्यते,

महं प्रार्थये । यदि तेन तदध्ययनावसरे सौविध्यं प्रदर्शयिष्यते,
तदा पूर्वं कामश्रोतृरूपेण (free-learner) – पश्चाच्च सम्भवतस्तदीया-
भिरुच्यनुसारेण समग्रच्छात्ररूपेण – तस्य प्रवेशनार्थं विद्यालयसत्रा-
लिकां प्रार्थयिष्ये । विद्यालयीयसत्रारम्भः शरदृतौ (= ओक्टोबेरमासे)
सम्पद्यते । यदि स प्रियो भागिनेयः सूनुश्चाऽत्रैवाऽस्मदीयगृहेऽस्मांस्त्रा-
वरं यापयेत्, तदेदं सुष्ठु नाम भवेत् तज्ज्ञानक्रमानभिज्ञातुं तदर्थीयं
चोत्तरकालीनं निश्चयं कर्तुम्, ईश्वरसाहाय्येन सह ।

श्रीमतीरेखायै संक्रान्तधनस्याऽप्राप्तिं विदित्वा चिन्ता मत्पार्श्वे संजायते।
मय्येतत्संक्रमणार्थं नियोजिता सचिवी मे पूर्णतो विश्वासार्हा भवति,
(इदानीमेव साऽवकाशा-
मन्ये (तया प्रागेवेदं प्रमाणीक्रियते स्म) । कार्तिकशुदिपञ्चमीं यावत् ।
मुपभुञ्जानास्ते (सत्स्वपि भवति!) कार्तिकशुदिपञ्चमीं यावत् ।
तत्प्रत्यावर्तनसमनन्तरमेव, यदि त्वत्तो नवीनान्येतद्विषयकाणि
वृत्तानि नोपलप्स्यन्ते, तर्हि सा तदुपरि मया पृष्टा भविष्यति ।

अधस्तनपक्षिणो मुखद्वारात् सहस्रशो मङ्गलराशिं प्रेषयिता
भवदीयो हितैषी

[signature]

एतादृशाः पक्षिणो[**] महानस-
गवाक्षस्य शिलाफलकेऽधुना
कदा कदा दृश्यन्ते ।
तानेवाऽऽोटकैः पोषयामि ।

[**] engl. 'titmice'

भवदर्थमम्बास्मरणमपि प्रेषयामि । आम्, दशावतारपुस्तिकायाः
प्रतीक्षां सोत्कं करोमि, यद्विषयेऽपि कृतज्ञोऽस्मि, गुरुदेव ।
त्रिविष्टपदेशः कुत्रत्यो भवति ?

॥ श्रीः ॥

CENTRE HOSPITALIER SPECIALISE
48120 SAINT-ALBAN
(LOZERE)

Tél. 101
Docteur Philippe VOUIN
PSYCHIATRE
~~SECTEUR MENDE-LANGOGNE~~
Secteur : LOZÈRE EST

॥ ढुण्ढिराजाय नमः ॥

SAINT-ALBAN LE: चैत्रशुदि द्वादश्यां गुरुवासरे
सं० २०३४

' (आमृत्भाषा ... मूलभाषा '

मयातितिक्षुणा भवदुत्तरं दग्ग्रस्तम् । (अहो, भोः! आश्चर्यम्! स्तूयतां दैवम्! भवत आसन्ना ऽऽगमनमिति धिया हर्षपुलकितं मे, मत्साहायकप्रतिग्रहश्च मैत्र्या अधिकप्रमाणमिव दृश्यते । (अन्तिमभवत्संदेहनिराकरणार्थं भवता विचारणीयं तदेव, यदहमनपत्यदारस्ततो निर्भरो निवसामि, अन्यच्च भवतिफरङ्गदेशगमनं गीर्वाणिवाण्यध्यापनस्यैव सरलसम्बन्धितावद्विराजते — न हि लौकिकस्वार्थस्य। अप्यन्यच्चान्ततोऽवश्यामिज्ञातव्यं भवति, यच्छ्रीबलदेवमुपाध्यायं प्रति प्रथममत्प्रेषितपत्रद्वारकमैत्रं नौ 'उद्घाटक-घटनम्' इव (= key-event) मज्जीवनस्य लक्ष्यते ? ।

गेहे कार्यालयपट्टे सद्यो भवत्संयोजितचित्रं श्रीढुण्ढिराजप्रतिमात्राणे सन्निहितं मया । इतोऽपि स सर्वान् भवतस्त्रातञ्नास्ते, कुर्वाणश्चाहं संस्कृतसम्बन्धितार्थं भवत्कुटुम्बदर्शनेन समकाले प्रीणान् आसे। (अविलम्बेन (मद्देशे 'lambin' इत्यपभ्रांशीयविशेषणं विलम्बिन्युपमेयम्!) भवत्पञ्जीकरणमेवाकारि[❀] (शुल्कमविस्मृत्य!) । भवतेऽधुना पातालदेशीयमुद्राणां सहस्रद्वयम् ($ 2000 ≃ १५००० रू०) दातुमिच्छामि (गमनमूल्यमनुला, यथा भवानवधारयिष्यति, परिसनगरे जीवनं सुव्ययमस्ति) । (अथ कतिपयश्चिद्वारेभ्यो मरयेव धनागारीयचेटिका- (= सङ्ख्या) न्विते सत्यपि, मया भवल्लिखितमग्रिमपत्रसंलग्नं च मिथ्याऽऽवाहपत्रं (= कृत्रिमबीजकम्, fictitious invoice), मम नाम्नि संस्थापितम् (सम्पूर्णानन्दसंस्कृतविश्वविद्यालयतः किंचिद्, यथा मन्निर्दिष्टनामनिबन्धमूल्यरूपेण), धनसङ्क्रमणायापेक्ष्यते । अन्यथात्र भवद्वसत्यन्तराले तद्धनं पातालदेशीयाऽऽत्मकं भवन्तं सम्पादयिष्यामि केवलम्। द्वाभ्यां प्रकारयोः श्रेयान् यथाशयं क्रियताम्, तदा भवदादेशानुसारेण वर्तयिष्यामि ।

भवदनूदितां 'मूर्खराट्' इति कथां सानुरागं पठितवान् । (अधुनोपोद्घातमेवाधीयान आसे, यत्रैतानि भवद्धस्तलिखितसुरुचिरवाक्यानि वर्तन्ते : -

✓

भौमवासर ... [illegible] ... मलेखोऽपि पृष्ठ
[❀] एव, भवत्पत्रसमादि[illegible]
आसीत् ।

'... संस्कृतानां 'मृतभाषा' इति व्याहरति लोकः। अस्यापवादस्य परिमार्जनाय प्रयासनिकुरुम्बेयं प्रयुक्तिर्मदीया। एवमेवान्ये भूयिष्ठाः प्रयासा अपेक्ष्यन्ते' - अतो मयोपरिनिर्दिष्टाऽऽदर्शवाक्यमद्य।

मयेह सलज्जं भयं प्रकाशयितव्यम्, यद्... भवत्साक्षिकं पुनस्तावन्मूको मूर्खश्च (मूर्खराडेव!) आत्मीयदेशे लक्ष्ये, यावद्धाराणस्यामेवाभूवम्! । अवरतो भवतोऽतिथिभूतस्य मदपेक्षया क्षमा पुनरपि नात्यन्तं श्रामयिष्यते, इत्याशंसमानोऽस्मि। अन्यच्च, सारतरवस्तु विराजते स एव भवताऽगच्छता संसेव्यमानस्तेज - स्व्यर्थः। उत्कृष्टानां तत्र सीदिष्यतां मनीषिणाम् (दिष्ट्या, सम्मेलनं परस्परदेशीयमस्ति!) केचिच्च भवतः पूर्वमेव ज्ञाता भविष्यन्ति, न संशयः।

अत्र कष्टं न स्थिरयन्ते भरतवर्षस्य मानसधनानि, भवदीयं च गमनमितरापेक्षयाधोगमनमिव भवतानुभवनीयमित्यत्र नाशक्यतास्ति। भवांस्तु मुदढो वीरः, यो यूरपदेशीयपिशाचेभ्यो भेतुं न शक्नोति!। वरं हि कश्चन विवादो भवता ततो निष्कर्षणीयः, सोऽयम् यो कलियुगविजयदर्शनान्निष्कृष्यते।

एवाङ्कद्वयममरकोषं चाद्यापि समुपलब्धवान्न, ततस्तद्विषये तूष्णीम्भावो मे। एतांस्तु 'दलपादेन' (यथोक्तमिह) प्रतीक्षमाणोऽस्मि, भवतो नितान्तं कृतज्ञतां निवेदयन्नेव।

अपि पुनर्भवता कतीनाञ्चिच्छब्दानामर्था निर्देशनीयाः, कृपया -

- वज्रजनायत्तम्
- सौविधयम्
- रोटिका (= अशनीयम् ??)
- एकपत्रम्
- श्रीदत्तजयन्ती

इति पृच्छयावसितमद्यतनं सुदीर्घवचनं भवदीयस्य हिताकाङ्क्षिणो मित्रस्य, वानदूकस्य शिष्यस्य च,

Philippe

अनु० १) 'मिथ्यावाहपत्रं' शौल्किकजनप्रार्थितसाधनपत्रमात्रमस्ति (प्रमाणपत्रं वा)। एतद्वस्तुतः कस्मैचित्कूटार्थाय न वर्तते (no forgery) अत्र विध्यनुसारीकारोपचारमात्रं (= 'simple formality of regularizing') विवक्षितं हि।

२) भवन्निबन्धनीयनिबन्धहेतु, उत्तरं दातुं कालन्यूनताऽतो भवान् न शक्नुयाच्चेत्, तर्हि कतरेण प्रकारेण धनं देयमिति सूच्यतामेव कृपया। अत्राऽऽवाहपत्रं प्रमाणरूपेण संलग्नम्।

... अद्य मे व्यावहारिकभाषाया अध्यायः शोभनः!

" Hyoscyamus " = Henbane इत्योषधेः किं संस्कृतेन नामास्ति ??
Bolmuayos Bilsenkraut

वाग्विलासः

२०३३ वैक्रमाब्दे, श्रीविनायकस्योत्सवे,

भगवन् सखे च,

गिरिकं ग्रामं मे परावृत्य भवदीयं श्रावणशुक्लपक्षकालिकं पत्रं मया लब्धम्[1]। भवतो बुद्धिमतः साधुभावान्वितांश्चोपदेशान् पश्चात् पठित्वा, अहो मे चेतोविकारः!। मानुशोचयदधुना मदीयस्य वाराणसेयवासस्य स्वल्पकालत्वम्। तत्स्वल्पस्थित्युपदेशात् तादृग्गमननिवारणमिति मूढस्य चरितमभविष्यदिति किन्त्वङ्गीक्रियताम्!। भवतः पत्न्यपत्यं च गृहं च कार्यालयश्चात ऊर्ध्वं मे ज्ञाताः, भूयिष्ठं च यथा भवत्सानन्दहितैषिचतुरचार्वीक्षणं सदा मामनुगमिष्यति, तथा भवतोच्चरितं प्रस्थानमङ्गलं मत्कर्णे पुनः स्वनते। कष्टं संस्कृतभाषामयसंभाषने मदासमर्थ्यैनैव भवतां सर्वेषामाशाभग्नेत्यत्र न संशयः। अनुगृहीतोऽपि सौम्येन मन्दबुद्धिरिव खलु स्माऽऽभामि युवयोश्च प्रशंसार्हक्षान्तविषयेऽपि नितान्तं कृतज्ञतां निवेदयामि। मामुद्दिश्य मया पूर्वं भवतेऽल्पं हि विज्ञापितम्। अधुना दंपत्योरावयोर्भेदमवगम्य नातिप्रचकितौ भवन्ताविति ममाऽऽशंसा (केन प्रकारेण विवाहविधिर्भारतवर्षीयानां पूजित इति विदितं मे)। आवद एतस्या ऊर्ध्वं विकृतं मे जीवितम्, यथैकवर्षस्यानन्तरं मया संस्कृतभाषाध्ययनं प्रारम्भि (पुराणज्योतिषानुरागो मे चिरादुत्पन्नो मातामयुपदेशात:)। उपदेशविषय एव यन्मे स्वल्पेन वाराणस्यां गृहीतव्यं ज्ञानम्, तस्य सिद्धिं भवांश्चितयामास। समागमो नौ (यद्यल्पकालिकः) चित्रकृतं मद्दृष्ट्यासीत्, ज्ञानप्राप्तिश्च मम दीर्घकालिक उद्योगस्तिष्ठति, कालप्रसरं त्वरयितुकामौ मा भूव। भवतोऽज्ञातम् (?- इति भवद्वैदग्ध्याद्धकुमर्थतो न शक्नोमि) बहु माध्यापयति भवान्, यद्यपि भवज्ज्ञानविस्तारापेक्षया बह्वेतत्स्वल्पतरं लक्ष्यते (यथा... विसर्गोच्चारणम्!)। आवयोः पत्रसंवादाविच्छेदमेवाधुना प्रसादवन् 'निर्बन्धेन याचे' (आत्मनेपदे!)[3]। तदपि मे विदितमद्य, यत् काशिपुरीं पुनरागमिष्यन् भवतोऽतिथिरहं भविष्यामि, प्रातिभाव्येन चैतेन मधुनेव मदीयं मनो मदितम्। यदि मे म्लेच्छस्यापि भवान् आत्मीयजन्मपत्रिकां प्रेषयेत् तर्ह्येतन्मैत्र्यविश्वासलक्ष्यं भवतश्चेतो मे प्रीणयेत्तमाम्। कर्माहं श्वः कुर्वे पुनरतोनिमित्तं प्रतीक्षितुं नेच्छामि यथाचिरं मद्वार्तां भवानधिगच्छेत्। भद्रं वाम्। भवदीयो दृढसौहृदः सादरश्च

[signature]

[1] अपि चित्रं मे त्वया समध्यगमीत्येतेन प्रश्नेन मम प्रागेव विदितम्, यद्भवताले खि। सपत्नीकस्यैव भवतश्चित्रवरं मां दृष्ट्वा प्रीणीतेतरां स्म भवान्, इत्याशंसे। यदि तथापि भवता द्वितीयस्य पुनः प्राप्तिरभीष्टा, तर्ह्येतत्सरलं ब्रवीतु भवान्।

[2] मल्लिखितप्रश्नविषये संक्षिप्तीकृत्य 'किं दृगुपलब्ध्यपेक्षयाधुनिकानि बीजानि स्फुटग्रहसाधनमध्ये स्थाप्यान्याहो स्विदागमाऽऽदरेण पूर्वाऽऽचार्यसूचितमूलाङ्केषु न किञ्चिद्धिकर्तव्यम्?' - इति यः प्रश्नो भवति, तमिममात्मनि पृच्छन्ते, मन्ये, पत्राङ्कर्तारः।

चैत्रकृष्णाष्टम्यां शनिवासरे वै० २०३४

ॐ

॥ श्रीलम्बोदराय नमः ॥

सुपेष्ठ गुरुदेव !

त्वदीयेन फाल्गुनशुक्लत्रयोदशीतिथिकपत्रेणाहमतीव चकितोऽभूवम्, किं पुनर्यतो रेखाप्रेषितेन पूर्वं ह्यस्तनदिने च समधिगतेन दूरलेखेन प्रतीयते स्म, यद्भवद्भिर्मदीयमेकोनविंशदिनाङ्कितं पत्रं (चित्रैः सह) न प्राप्यते स्म, नापि स्यात् पेरिसनगरे मात्रा सह लिखितश्चित्रलेखः ('post-card')।

इदं तु नातिचिरं भवद्भिः प्राप्स्यत इत्याशंसे। मम प्रवासाभ्यन्तरमद्यापि च पत्रवाहनं फ्रन्स्-देशे बहु संक्षिप्तमभूत्। यथा कष्टं मया वाराणसीतः प्रेषितायाः पत्न्याऽऽसन्नत्रिंशतः पत्रं केवलं (शेषां त्रीण्येव मात्रा) अत्र समधिगतानि, यथानिर्दिष्टं मे।

अन्यच्च सत्यम्, सन्तअलबाँग्राम आगमनात्पश्चात् प्रथमसप्ताहे संस्कृतमयपत्रस्य रचनातिदुष्करा भवत्, कालविरहान् मदीयतात्कालिकचित्तभावहेतोश्च। भवतां चिन्तां गृह्णामि तत्प्रति शोचिमि च खलु, भवन्तस्त्वनेके सार्कं समुद्रे तिमिरिव स्वीयस्वाभाविकतत्त्वे जीवन्तः, देवपूजां देवमन्दिरदर्शनं च कर्तुं छात्रैर्मित्रैश्च सह धर्मस्य फलितस्य चौषधिकाव्यादिविद्यानां च चर्चां[1] यथाकामं कर्तुं च शक्नुथ भोः!। अत्र प्रत्युत त्वदुपहृतग्रन्थान् विना मित्राणि, यैः सहैवैतादृशं सम्भाषणं सम्भवेत्, कुत्र भवन्ति ?।

अन्यच्च त्वया फ्रन्स्-देशे त्वदीयप्रवासे दृष्टमभूत्, ततः कार्यं मम मा गणय। त्वदुपस्थित्यवसरे ममापराह्णा मुच्यन्ते स्म। प्रायस्तु पञ्चवादने (अपराह्णे) केवलं गृहं प्रत्यागच्छामि। तदा मया रात्रिभोजनसाधनमपेक्ष्यते (दासी माध्याह्निकभोजनमेव प्रस्तौति), संस्कृतभाषासमुद्रेऽभीष्टनिमज्जनात् पूर्वमपि चान्यानि कर्तव्यानि भवन्ति बहुशोऽत्रत्यानां बाधनत्वात् तस्मिन् सौहित्यभाक्पुरुषे, यो भारतवर्षे एकमासमवकाशमुपभुङ्क्ते स्मेति। मया योक्तव्यमपि, यदेकलतानुभवो मेऽध्ययनं रचनां च मन्दीकरोति, स्खलनपरिहरणार्थं शब्दकोशेषु बहूनां शब्दानां परीक्षणमपेक्ष्यते च (इदं भारते गृहीतव्यं न वा, इति न जानामि)। पूर्वमेव वाराणस्यां त्वया वैयाकरणवरेण्येन सह सम्भाष्याहं महाक्लेशमनुभवामि स्म, यदा यदा मत्स्खलितानि प्रबुध्यामि स्म, यतो गीर्वाणवाणीव्यवहारो मन्येऽशुद्धत्वं न क्षमते - इति प्रकाशं वदामि।

रेखा भागिनेयाश्च, ये कदाचित् फ्रन्स्-देशे न गताः, भारतीयाऽऽचारेभ्योऽत्रत्यानां जीवनं मनोवृत्तिं ('mentality') चानुमितुं शक्नुवन्ति न। यथा भवद्देशे सर्वे हितैषिणोऽहिंस्राश्च सत्यवादिनश्च मदपेक्षया लक्ष्यन्ते स्म, तथात्रत्याः प्रत्यहं कलहप्रियाः (कर्कशा अपि कदाचित्) असरलाश्च प्रतीयन्ते (अन्ते, यथा मया पूर्वं लिखितम्, हिन्दुं न जानन्तीति तेषामज्ञानचिह्नं भवति!)। कृपया गुरुदेव त्वदीयभविष्यपत्रेष्वनुशोकं मे मा वर्धय, वरं क्षान्तिं शान्तिं चाध्यापय। मया सांवत्सरं (पुनर्गमनं यावदित्यर्थः) धृतिकवचमपेक्ष्यते, भवतः प्रोत्साहनशब्दाः प्रीतिचिह्नानि चापेक्ष्यन्ते खलु। परस्परस्नेहो नः, प्रेमा वा, प्रीत्युत्पादकः

[1] कदाचिद् रेखापेक्षया महात्मनस्यापि (यथा रामकृष्णेन प्रेक्षसतीर्थेन सह)

केवलं भूयात् । पूर्वं भवतां समाश्वासयानां ज्ञातव्यम् , यच्छारीरस्वास्थ्यं मे श्रेष्ठं भवति । वराकमातुलस्य मनसस्तु किं वर्तिष्यते , यद्यत्र (स) निष्क्रमाव: पूर्वमेवाऽत्यल्पविश्वासान्वितश्च शृणुते , यच्छ्रीमती रेखा भगिनी तत्र भारतेऽश्रु मुञ्चति , मधुगोलकान्यपि न भक्षते (यदा तया तद्द्विगुणं भोक्तव्यं भवेन् न्यायत: - यद्युपहासकमत्रानुज्ञातं भवति !), यद् भागिनेया विषण्णं मुखं दर्शयन्ति , यद् गुरुदेवोऽपि तन्मत्वा, यद्वयं विस्मृतवन्त: कर्तुं न पारिवन्तो वा, पीडितो भवति ? (अत्र सर्वत्र तमाखुविपणेष्वल्पमूल्येन ज्वलनयन्त्राणि लभ्यन्ते ! तावन्नानाविधग्रन्थ-द्रव्याद्युपहारान् मे दत्त्वा (बाह्वपेक्षया मे दुर्भराश्च !), कथं त्वं वक्तुमर्हसि , यद्यथा-संकल्पितमुपहारसमर्पणं मे न कृतम् (एतेषां सर्वेषां ग्रन्थानां पठनेनानेके वर्षा अपेक्षिष्यन्ते न संशय:, इत्यगणयित्वा) ?

सर्वं यदत्रालेखि , तद् भवद्दृष्ट्याद्याऽरभ्य मदीयप्रवासस्मरणात् सत्यतरं स्वीयाधुनातनत्वाद्भवेदितीच्छा मे । वाचस्पतिना द्वितीयं नीलवर्णं घटीयन्त्रं ध्रियेतेत्यपि च। सर्वं यन्मे रमणीयं मनोरञ्जकं च भवेत्तदन्वेषिणां भवतां सर्वेषां मत्कृते प्रातिक्षणकं पूर्णाधिकार्यत्वं ('disposability') मत्प्रवासस्य बलिष्ठं स्मरणमवतिष्ठते, यस्मै कृतज्ञतां मे सदापर्याप्तं भवतो निवेदयिष्यामि ।

(अद्यतनपत्रस्य समाप्ते: प्राक् कश्चिदुपदेश: श्वेतप्रदरचिकित्सायै लिखितव्य: (रेखा जानाति)

1) PULSATILLA 3° X ale
2) HYDRASTIS 3° X ale

} द्वयोरपि बिन्दुत्रयं किञ्चिज्जले गृहीतव्यं प्रत्यहमुत्थाय त्रीन्मासान्

'Homoeopathical' चिकित्सास्ति । यदि भारते दुष्प्राप्या भवेत् , तदा ब्रवीतु मे कृपया । ततोऽहमिमां प्रेषयेयम् ।

मन्ये भवन्त इदानीं प्रसन्ना: । भवतां हिताकाङ्क्षी भवदीयो मातुल:

Philippe

When Rama's wailing reached her ears Sita was filled with dire dejection.
For Sita's safety Lakshman drew a magic circle of protection.
Ravan appeared in weird disguise and stole sweet Sita from the hut:
Eagle Jattayu challenged him by whom one wing of his was cut.

जब श्री राम की सुनी दुहाई, सुन सीता माता अकुलाई।
हठ कर, जब देवर को देखा, तब लक्ष्मण ने खींची रेखा।
रावण ने छल-नीति दिखाई, पंचवटी से सिया चुराई।।
गिद्धराज ने जब ललकारा, पंख काट भागा हत्यारा।।

भाद्रवदिदशम्यां चन्द्रे, वै० २०३५

प्राणप्रिय गुरुदेव !

श्रावणीहुस्तनदिनेऽत्र रक्षासूत्रं समधिगतम्। भगिन्या मातुश्चाभावे मदीयस्य मनश्चिकित्सागारीयविभागस्य पर्यवेक्षिका (त्वया पूर्वमेवात्र दृष्टा), यतो ब्रह्मवादिनी (अत्र फ्रान्स्-देशे ब्रह्मवादिन्यो भगिनीति सम्बोधनेनैव समाहूयन्ते), तत्सूत्रं दक्षिणमणिबन्धे मे दृढं बद्धवती। इदं भाद्रशुदि-षष्ठीं यावद् धरिष्यामि, यथा वाराणस्यामेव सतीर्थ्येन रामकृष्णेन निर्दिष्ट-मभूत्। तदुपरिलिखितं त्वद्विरचितं च शोभनाऽऽशीर्वादरूपं समर्पणं बहु रोचते मे। ततस्तव भगिन्याश्च धन्यवादान् वितरामि मुहुर्मुहुः।

तत्समानकाले (= श्रावण्यामेव) परिसनगरे मातृद्वारा सेलीन्-सख्या मणि-बन्धः समानसूत्रेणालङ्क्रियते स्म ! ततः (पत्रान्तेऽपि च) सा सुप्रसन्ना त्वत्कृते चाधिकतमं कृतज्ञाभूत्, यथोत्तरपत्रे तया लिखितं नूनं भवेत्।

'कपोलकल्पितः', 'कटिबद्धं शासनं' चेति शब्दयोः कोऽर्थः ? मया गाण्डीवं नाम संस्कृतसाप्ताहिकं प्रीतिपूर्वमभ्यस्तं भवति। यदि तव निकटे तस्य जीर्णशाराः (? old copies) वर्तन्ते, तर्हि तत्प्रक्षेपात् कतिपये मदन्तिकं प्रहीयन्तां वरम्, कृपया। संस्कृताभ्यसनार्थं साप्ताहिकमेतद्धरिष्ठं दृश्यते। कष्टं मयाद्यात्र विरमणीयम्। भवतां सर्वेषां भव्यवार्ताः प्रतीक्षमाणो हिताकाङ्क्षी च भवदीयः

Philippe

मया मातुः प्रथमं चित्रमेतद्रेखाकृते प्रहीयते, यद्यपि मात्र एव न रोचत (स्वशोभाचिन्तया स्त्रियो दुष्प्रसाद्याः खलु !)। तया बृंहणार्थं द्वितीयं ग्राहयिष्यति।

॥ श्रीः ॥

सैन्त्-अल्बाँस्-ग्रामे,
श्रावणवदि द्वादश्याम्, सोमवारे,
ई० २०३५

सुप्रेष्ठ गुरुदेव !

अद्य निर्दिष्टदिवसद्वयपश्चात्क्रमेण सहातिशोभनलेखनपत्रमिदमेवावाप्तम्। भो मित्र ! तवैतावता दानशीलेन मत्कृते लज्जेतराम् नूनम्। अहो त्वियति सुचारुपत्रे त्वदर्थीयस्य देवनागर्यक्षरविन्यासस्य हृदयसंप्रीतिजननप्रभावः ! ।

गततरणिवासरे मातरि सेलीन्सख्यां चानुजे मे च साक्षिभूतेषु, मया श्रीगणेशः सरस्वती च पूज्येते स्म। पूजोत्तरं यथासमर्थितं रेखाया मम च सौभ्रात्रं मया सेलीन्सख्यै निवेद्यते स्म। अतः सावीदानीं कुलबन्धं नौ जानाति, यज्ज्ञात्वैव मनागपि विस्मापिता नाभूत्, किं पुनर्यतस्तया पुनर्जन्मसिद्धान्तोऽङ्गीक्रियते।

अद्यैव मयि त्वत्प्रेषितानां पत्राणां शुद्धोत्तरार्थीयमेकं प्रणाले प्रथमपृष्ठोपरि चतुर्थ्यो मासेभ्यः प्राक् त्वल्लिखिताः पङ्क्तयो मदीयदृष्टिपथमुपगताः। इमाः पठित्वा, अहो महाहृदयकम्पो मे ! । ततस्तन्त्रीसन्देशशब्दमप्याविष्करोमि। रेखाया व्याकुलचित्तत्वमिदानीमपहृतं भवति, स्वभ्रातुष्पत्रप्राप्त्यास्याः प्रसन्नताजनीत्याशंसे - यद्यपि तत्र (भ्रातुष्पत्रे) भवदीयगृहविरहार्तिः स्थाने स्थाने प्रकाश्यते स्म।

(श्वस्तनेऽह्नि लिखितः शेषः) कष्टम्, मातुर्बृहच्चित्रमत्र परिसनगरेऽपि न वर्तते। यच्चित्रं रेखायै भूयिष्ठेन रोचते, तस्यैव बृंहणं नैष्कर्म्यं खलु, यतस्तदुपरि सा माता संमुखं गृहीताऽतिस्थूलकपोलगल्लुवती दृश्यतेति नौ मतिः। तया तदर्थं परिसनगरे[1] पश्चाच्चित्रग्राहकालये गन्तव्यमेव।

केषाञ्चिदुच्चारणानां काठिन्यमतिक्रम्य (मन्ये, एतानि पश्चात् समग्रग्रन्थानुशीलनद्वारा स्पष्टीकर्तुं शक्यानि), त्वद्विरचितप्रास्ताविकस्यानुशीलनेन मनः सन्तोषो मे नितान्तमजनि।

बैठे तरू की डाल पर, नटखट नटवरलाल,
छलिया छैला हैं मगन, डोल रही है डाल,
राधा के मन में बसे, नटवर नन्दकिशोर,-
मन की बातें पढ रहे, नयनों से गोपाल.

Krishna is so playful, jolly and sweet,
Even the green twigs glance at him and greet.
Radha is thrilled, to see him so gay
And he watches her, not knowing what to say.

1. प्रत्यावृत्य

(अद्यतन्याः समाप्तेः प्राक्, पञ्चाङ्गीयवचनसम्बन्धिप्रश्नद्वयं ते ददामि ।

१) यायिजययोगः स्थायिजययोगश्चेति किमस्ति ? (मया ज्योतिष-ग्रन्थेषु तद्वर्णनं न लभ्यते)

२) मध्याह्नोदयव्यापिनीत्यादिषु शब्देषु व्यापिनीत्युत्तरपदस्यात्र कोऽर्थः ? ततः (समासेभ्यः) किं विवक्षितमस्ति ? अपि °व्यापिनी तिथिरिति शेषोऽस्ति ?

सेलीन् कनिष्ठभ्राता च पूर्वमेव प्रस्थाय, आवाम् (अहं माता च) भवतां सर्वेषामारोग्यं चेतःप्रसन्नतां च भृशमाकाङ्क्षावः । ऐस्रायै माताऽऽशीर्वादं ददाति । शिष्यो भक्तश्च ते मङ्गलैषी,

Philippe

CENTRE HOSPITALIER SPECIALISE
SAINT-ALBAN
(LOZERE)

Tél. 101

SAINT-ALBAN, le :

श्रेयांसो भारतीयज्योतिःशास्त्रकर्तारो दृग्गणितैक्यं प्रति निर्बन्धेन
याचन्ते । एतद्विषये पाश्चात्त्याधुनिकविज्ञानेनात्यन्तसूक्ष्मता प्राप्येति
कृत्वापि पौराणिकविधीनां त्याजनमेव भवितव्यम् ? या न्यूनाधि-
काऽऽसन्नतैतैरेव लभ्यते, सा प्रतिदिनं व्यवहाराय पर्याप्ता खलु
भवति । अथवा परमर्थमागृह्णीयुरस्पष्टं च दर्शयेयुरिति कल्पनीयम् ।
अपि ननु न्यूनविषयानुभवदृढीकरणं नेति सारम्, वरं हि सर्वाति-
शायीन्द्रियातीतसत्त्वस्य विकलमप्याग्रहणम् ।

तथा हि चन्द्रानयने सांप्रदायिको विधिरसमाप्त इव लक्ष्यते ।
मञ्जुलश्रीपतिभास्करचन्द्रशेखराचार्यनिर्दिष्टबीजसंकलनेनैवाङ्कानां
रूपान्तरं कृत्वापि[1] गर्भीयचन्द्रबिम्बस्य सत्यस्थानं निश्चीयते । अथ
चन्द्रस्थानं गगनेऽयत्नेनाऽऽलोकनीयं दृढीकर्त्तव्यं च । तेन लम्बना-
वनतिसंस्कारौ समीक्ष्य दृग्गणितलब्धतुलनं सुकरमभवत् । अपि
तस्मात् साभिप्रायं पूर्वाचार्यैर्यथोपदिष्टा (दृगपेक्षया विकला इत्यर्थः) वि-
धयोऽर्पिताः ? किंस्विदेतैरिन्द्रियप्रामाण्यं मायान्यदृश्यत[2] किंचिच्च
सत्यतरं विवक्षितमभावि (यथान्योन्यान्विततातत्त्वेनास्माकेन्द्रियन्यून-
तया च मण्डलमिहाण्डाकारमभाति ग्रहगतिरपि च चेतोनुभत्यपेक्षयैव
जायत इति श्रूयते) ? – तदर्थे भारतीयज्योतिषाऽऽसक्तभावो विप्रति-
पन्नश्च यूरपदेशीयच्छात्रः पृच्छति भवन्तम् ।

१ युक्तमविधिमनाप्त्वा प्रायेण भास्कराचार्यो मम इति महावसा-
दाऽऽस्पदं ममाभूत् । 'यद् बीजं केनचिदुक्तं तच्चेत्स्वा-
२ आत्मकीयदृक्प्रामाण्यापेक्षायाम् 'नृदृष्टचवि-
साध्यं तर्हि त्याज्यमुपेक्ष्यम्' इति मुनीश्वरोक्तं विचिन्तनीयम् । अतः किं दृग्गणितैक्याऽऽवश्यकतया ? ।
षयत्वम्' च [illegible]

॥ श्रीगणेशायनमः ॥

Vishnu was born as Dasharath's son who brought those demons to their knees.
Who, of sage Vishwamitra, were proud and notorious enemies.
Rama, whose touch was magical, a touch that was his very own,
Freed Gautam's wife, Ahilya, from long imprisonment in stone.

त्रेता में दशरथ-घर आये, कौशल्या-नन्दन कहलाये।
मुनि के सारे कष्ट मिटाये, अत्याचारी मार गिराये।।
पत्थर बनी अहिल्या तारी, मुक्त हो गई गौतम-नारी।
हरी पाप की सब अँधियारी, दमकी पुण्यों की उजियारी।।

अपि काश्यामिदानीं
क्षीरचम्पकप्रसूनानि दृश्यन्ते ?

कार्तिकवदि षष्ठ्याम् , रविवासरे
वै. २०३५

प्रेष्ठ गुरुदेव भाम च !

गतगुरुवासरे तव विजयदशमीतिथिकं पत्रं दशाहराकूर्चोण्डुकविषयकैर्व्याख्यानैः पुष्पेण च सह सम्यगवापि । अहो चेतसो मे भवतां सर्वेषामनिशं स्मरत आर्द्रीभावः ! । सेलीन्-सखीद्वारा मदीयस्य काशीगमनस्य पुनर्घटना प्रतीयत इत्यनुभवामि, तस्याश्चाऽऽश्चर्यप्राप्तिमनुमिनोमि । तया त्वदीयपत्रस्योपरि क्रोडपत्ररूपं लिखितमेव, यत् त्वं महागुरुरसि, येन सह कथङ्कारमावाभ्यां भारतवर्ष एव सेवनीय इति प्रश्नविषये तया सम्भाषितमभूत् । 'तस्य (=तव) स्पष्टीकरणानि स्फुटानि सरलानि च सदा भवन्ति, व्यवहारविषमत्वमनादृत्य' इत्यन्यलिलिखितम् । तस्या अनुलेखपठनेन दृढीक्रियतेऽपि, यच्छ्रीमत्या भगिन्या यत्किञ्चिद्वैषज्यं दुरङ्गीकृतं भवति ! । एतद्विषये प्रश्न एकोऽनुज्ञायताम् । अपि सा पुना रोगाक्रान्ताभवत् ? अपि स्वमूर्च्छणामसमग्रा हानिरभूत् ? स्वीयप्रदरस्य वा ? । कृपयाग्रिमपत्रे रेखास्वास्थ्यं विज्ञापय मां विस्तरतः । तया च किंविशिष्टं भैषज्यं संसेव्यं भवति ? ।

मया दूरभाषणयन्त्रेण माता विज्ञापिता, त्वदीया दौहित्रा त्वां प्रणमन्तीति । वचनमिदं श्रुत्वा प्रहर्षिततमा जायते स्म, यन्त्रान्तर्गता च तदीया वाक् क्षणं चकिताभवत् । तव पुनर्दर्शनं दुहितृदौहित्राणां चात्मीयानां भव्यपरिचयं च मत्वा सा प्रसादोत्फुल्लमनसा भवतीत्येतस्य भवदर्थीयवचनस्य संक्रमणे सा मां नियोजितवती ।

कष्टं संस्कृतेन लेखनं तत्प्रवृर्षित्वमनादृत्याऽऽयासकमपि भवति मे (फ्रन्स्-भाषातः), ~~[illegible]~~ तेन च कालोऽधिकमपेक्ष्यते । अद्य त्वष्टकाशादिवसेऽपि मया मदीयाऽऽरोग्यालयविभागाधिकृतानां परिचारकाणां परिचारिकाणां च वार्षिकमङ्कनं विधातव्यम् । ततो यन्मया श्लेष्माशयविषये कल्प्यते स्म, तदेव त्वत्परीक्षणं नेतव्यमित्यस्मिन् सेलीन्-सखीं नियोजयामि ।

भवत्पार्श्वे तस्या मङ्गलनिवासावसानमाशंसे । भो रेखे, तत्प्रस्थानवेलायां विमानस्थले मा रोदिषीः ! मातृपुरःसरः स भ्राताचिरमागमिष्यति ! । सर्वेषां हितैषी कृतज्ञश्च, Philippe-शं कुर्यात्पीताम्बरः !

|| श्रीगणेशाय नमः ||

प्रेमी और प्रेमिका झूलें सचमुच अनुपम सुख सरसाता ;
झूले प्रिया झुलावे प्रियतम तो आनन्द और बढ जाता ।
राधा की सुन्दरता उनके अंगों की कोमलता प्यारी ;
देख मुग्ध खोये उस छवि में लीन झुलाते हैं बनवारी ॥

SWING OF LOVE — When lovers swing together, it is delightful and romantic, but it is rather more romantic if one of them helps the other one in the game. Krishna helps Radha in swinging, her charm and tenderness are rather increased.

मङ्गले कार्त्तिकशुदि सप्तम्याम्,
वै० २०३५

प्रेष्ठ गुरुदेव !

तत्प्रत्यागमनविमाने वराकी सेलीन् अभ्यन्तरबाह्यवातावरणीयभारयोर्वैषम्योद्भवाभिघातात्कर्णशोथेनोभयत आक्रान्ताभूत् । ततः प्रभृति सा कतिपयदिवसान् ज्वरिताभूत्, अद्यापि च तया कर्णशूलमनुभूयते । किन्तु भोः, अहो प्रत्यागतायाः एव तस्या वागुत्साहो हृत्प्रीतिश्च श्रद्धोन्मादश्च ! । दूरभाषणयन्त्रेणैव सम्भाषणं नौ भवति स्म । कष्टश्वाऽऽगामिमासे केवलमत्रैव मया तद्दर्शनं लप्स्यते । तयाद्य पूर्वं तु तवाभ्यर्चनीयगुरुदेवस्य विषये, हृत्स्पृशन्त्याश्च श्रीमत्या रेखाया विषये, तत्प्रेमपात्रीभूतस्य च बालकत्रयस्य विषये भूयिष्ठं यथाशक्त्या नन्वभाणि ।

एवं पूर्वमेव जानामि, यदुपहारा मां प्रतीक्षन्तेतराम्, येष्वेव मदर्थं त्वत्क्रीतं ग्रन्थद्वयं वर्तते, चिकित्सां विशेषादेषमोऽधीयानोऽस्मीत्यवबुध्य । तद्यथैतद्विषये शार्ङ्गधर्याः पूर्वखण्डे शारीरविषयकपञ्चमाध्यायस्य पठनं प्रकाशनं नाम मेऽधुना यावद्रसधातुदोषविपाकाद्यार्थनजानानस्याभूत् । तत्त्वज्ञानैषिणः शिष्यस्य द्रव्यगुणविज्ञानेन चिकित्साभ्यासेन च ज्योतिषाध्ययनमावश्यकतया परिष्करणीयमित्यनुमिनोमि ।

सदा गाण्डीवपठनेन चेतो मे प्रीयतेतमाम् । चुटकुलाश्चापि सहासं संस्कृतभाषामध्यापयन्ति खलु (एतदपेक्षया चुटकुलाशब्दस्य व्युत्पत्तिः कास्ति ?)। त्वद्विरचितं 'जीवनाधारकवृत्तीनामेवाऽऽरक्षणं राष्ट्रहिताय' इति शीर्षकं पत्रं बहु मे रोचते स्म, यद्यपि ममापर्याप्तभाषार्थज्ञानात्तत्र किञ्चित्काठिन्यं स्थाने स्थानेऽवतिष्ठते ।

अन्यच्च किं पुनः श्रीगोपालशास्त्रिसंमतोऽनियन्त्रणमस्मि, यतश्चिरकालादयं जनो विस्मयत एव, यद् गाण्डीवे सन्धिः सर्वत्र न विधीयते । यथा, कुतः 'दास्येव स्याद्' इति स्थाने 'दासी एव स्याद्' इति वाक्याङ्गं तत्र लिख्यते ? । ये वैदेशिका अमरभाषां मद्वदधीयते, तेषां सर्वेषामेव सन्धिनियमपरिचयः सर्वप्रथमं कर्तव्यमस्ति । ननु भारतीयैरेव सन्धिविधानदृष्टान्तोऽस्मभ्यं दातव्यः ? त्वयाप्याऽऽत्मीयपत्रेषु सन्धिप्रयोगः सर्वत्र क्रियते । कैश्चिदन्यैर्विद्वद्भिः कुतो न ? ।

पश्य, इदानीमेव मया मातापुत्रयोरागमनस्य प्रस्थानस्य च सूक्ष्मास्तिथ्या-दयो विज्ञाप्यन्ते !

परिसनगरतो मङ्गलवासरे ३०.१.७९ ख्रीस्ताब्दीयदिनाङ्के
७.२० वेलायामपराह्णे (भारतीये काले)
'Air India' नामक.
समाजविमानोड्डयनम्

हस्तिनापुरप्राप्तिर्बुधवासरे ३१.१.७९ (=वसन्तपञ्चमीहस्तनदिने)
५.२० वादनवेलायां पूर्वाह्णे

हस्तिनापुरत उड्डयनम् ३१.१.७९, ९.२५ —— ——
काश्यागमनम् —— ०.५५ —— अपराह्णे

प्रस्थानदिनाङ्कः ३.३.७९, २.५–२.५० वा वादने पराह्णे
(काशीतः)

एवं सति महाशिवरात्रिरपि प्रवासाभ्यन्तरे पतिष्यति। इति गताब्दीयप्रवासाद्भेदः। यदि सा माता सरस्वतीमहोत्सवे वायुयानेन किञ्चित्क्लान्ता भवेत्, तदा स्वीय-दौहित्रकृताङ्गमर्दनेन तस्याः सुस्थितिः शीघ्रं पुनर्भवेदिति विनिश्चयो मे।

अत्राद्य समाप्तुकामः (मयैवंविधबहुव्रीहिरपि प्रयुज्यत इत्यवेक्षस्व) सेलीन्-सम्भावनायै भवदीयायै सर्वानपि कृतज्ञतां भृशं प्रकाशयामि। भवदीयो हितैषी मातुलः

Philippe

॥ श्रीमद्गणपतये नमः ॥

नभस्यबहुलपञ्चम्यां रविवासरे, वै० २०३६

docteur philippe vouin

secteur psychiatrie-adultes lozère-est

48120 saint alban sur limagnole

प्रेष्ठ गुरुदेव !

त्वदीयनभोमासशुक्लप्रतिपत्तारिकाङ्कितपत्रप्राप्त्यनन्तरमहमुपाकर्मदिवस एव पश्चत्-हायनवत् त्वद्विरचितश्लोकरक्षासूत्राभ्यामलङ्कृतं पत्रं लब्धवान् । कियानयं द्विगुणः प्रसादस्तदा मेऽभूदित्यनुमिनु भोः ! । दिष्ट्यात्रस्थयाऽम्बयैवैवमोपि परारित्-हायनवद्रक्षासूत्रं भाग्यवतः प्रियहरेर्वामेतरमणिबन्धे सम्बद्ध्यते स्म । अन्यत् षट्त्रिंशशरत एकचत्वारिंशशरं यावदभिविधौ गाण्डीवमत्र समधिगच्छति स्म, यत्र (एकोनचत्वारिंश एव) 'प्रागैतिहासिके काले संस्कृतं विश्वभाषा' इति शीर्षकं लेखप्रकाण्डं पठनीयमभवत् (तव चित्रेण भूषितं च) ।

कष्टं मयाषाढशुक्लाष्टम्यां लृट् तात्कालिकाभिप्राये प्रयुक्तमभूत् (यथा 'प्रवक्ष्यामि, द्रक्ष्यामि' इत्यादौ वचने), ततो मत्प्रेषितः प्रथमवर्णचित्रकूर्चस्त्वदीयपत्रपुटकभेद-द्वारा पतितो विनष्टश्च भवेदित्यत्र न कश्चित्संशयः (शास्त्रोत्पतिना पत्रपुटाङ्कविषये सुष्ठु विलोकितमनुमतं चाभूत्) । भवत्पार्श्वे चिरकालीनप्रतीक्षाहेतोर्विनाशमिममनु-शोचामि खलु, किन्तु मत्पार्श्वे विषादो वस्तुतो नाभूत्, यतस्तत्समाकर्ण्यैव वर्णचित्राणां द्वितीयं प्रकाशनमाज्ञापितवान्, यस्यैव फलं मयात्रत्ये स्थूलतर-दृढीकृतपुटके सन्निविष्टं भवदन्तिकं च प्रेषितं भवति ।

(अयि भो मित्र ! यथा यथा जरां यामि, तथा तथा श्रीमद्गजाननभक्तियुक्तो भवामि । सुहृद्वत्तेन सह कदाचिदपि मनसि भावनानिमग्नोऽस्मि । तस्य तत्सेव-नस्य चोपरि त्वया प्रत्येकभविष्यत्पत्रे किञ्चिदुपदिष्टं भवेदिति गुप्तमनोरथो मे । तमेवाऽऽहूय 'पण्डितानामाराम:' इत्याख्यस्य फ्रान्स्-संस्कृतकोशस्य रचनामा-रब्धवान् । तया तु ममैकाकिनो भगीरथप्रयत्ना अपेक्षिष्यन्ते बाढम् । बहुका-लोऽप्यपेक्षिष्यते नूनम् (अतिकृपालुसर्वशक्तिमद्विनायकस्य चापि साहाय्यं विघ्ननिवारणाय !), किंपुनर्यतो ज्योतिषद्रव्यगुणाद्यध्ययनस्य तदनुषङ्गि-त्यागो मत्पार्श्वे मा भविष्यति, ततः प्रतिदिनं मया कतिपयशब्दाः केवलं कोशेऽस्मिन्नुल्लेखिष्यन्ते हि ।

अम्बाप्यत्र लेखान्ते कांश्चिच्छब्दान् संयोक्तुकामास्ति । तस्यै लेखनीदानात्पूर्वं त्वां श्रीमतीं च रेखां भागिनेयात्र शुभाशीराशिभ्यो मङ्गलेभ्यश्च प्रणामेभ्यश्च

कृतज्ञतां प्रकाशयति पीताम्बरधृग्जनार्दनं च भवदर्थमभ्यर्थयते
त्वदीयो हिताकाङ्क्षी स्नेहलश्च

[illegible]

<u>क्रोडपत्रं</u>

'... इति <u>निश्चप्रचम्</u>' इति वचनस्य कोऽर्थः? (नागर्यां नामलेखनस्याभ्यासो मेऽपि नास्ति !!)

Dear Gurudeva.
I wrote you in Spain with my mother.
Now I am in Saint-Alban in Philipp's house for a fortnight.
Naturaly we talk often of you.
I also have much thanked Shri Ganesha for Dominique. Now he is again on his boat.
I hope you are all well-being, and send to you, to Rekhā and the children also my affectionate thought.

Very Yours Michette

ॐ

॥ श्रीमद्गौरीगुरवे नमः ॥

कार्तिकामावास्यां रविवासरे
वै० २०५६

प्रेष्ठ गुरुशार्दूल !

तं पठित्वा, त्वदीयः प्रस्थितायाः वक्रायाः अनुस्मारयञ्छ्लोको
हृदयमर्म मे प्रसभमस्पर्शत्। परन्तु मया 'लीलां संवृत्ये'
ति तदन्तर्गतं वाक्यं सुष्ठु न गृहीतं धात्वर्थसंशयात्।
अपि त्वया सं√वृ उत सं√वृत् इति धातुरेवं प्रयुज्यते स्म ?
कृपया केनचिद्ध्रस्वेन व्याख्यानेन तदर्थः प्रकाशीक्रियताम्।
किं वा त्वयार्थद्वययुक्ताव्ययशब्दस्य प्रयोगो बुद्धिपूर्वकं कृतम्?
श्रीमत्याः पञ्चत्वकालादेवायं जनः प्रतिकाररूपेण वान-
स्पतिकविषयान् प्रति महोत्साहेनोत्थापितो भवति स्म।
संस्कृतस्याध्ययनक्षेत्रे मे विविधविषयसन्धारयन्त
आनुक्रमिकास्तरङ्गाः सहसैवं दर्शनीया भवन्तीति
त्वया पूर्वमेव निरूपितं भवेत्। समुद्रेऽस्मिन् किञ्चि-
ल्ललोप्तुं न शक्यते। यथा तूष्णीम्भूयानेकमासानन्तरं
ज्योतिःशास्त्राध्ययनं पुनः प्रकाशनीयं भवति, शब्दकोष-
रचना वा, वानस्पतिकनामविवरणपञ्जिकापि वा।
एवं सान्तरप्रकारेण ममैकैकविद्यागमो दृढो भविष्यति,
यदि तु तत्पाकुर्वे तत्फलदर्शनार्थं त्वरा नास्ति।
अन्यच्च, नन्वेवंप्रकारेण वाराणस्यामेव भवदालये
त्वयाऽध्यापनं क्रियते, यत्रैकस्मिन्दिवसे कदाचि-
द्व्याकरणस्योपरि संभाष्यते, कदाचिदुद्भिज्जद्रव्य-
गुणानामुपरि (भोजनार्थं च तत्साधनमविस्मृत्य !),
कदाचिदपि धर्मविषयाणामुपरीत्यादि ?।
इदानीमेव – भो मित्र ! – अपि नाम त्वयका
सह भारतीयेषु मार्गेष्वहं वानस्पतिकतरङ्गेण
चालितस्त्वां च सेवमानः, वृक्षाणां लतानां
चाभिज्ञानमभिधानं च कुर्वन्, भ्रमेयम् ?।
तत्कालमस्मिन्नसम्भाविनि सति, मत्पार्श्वे कस्यचि-
द्वानस्पतिकनामग्रन्थस्याऽऽलोचनात्मिका रचनापि
सुष्ठु प्रक्रान्ता, विविधग्रन्थानां समालोडनतः (येषा-
मेव त्वया विगतमाघमासे प्रदत्तं 'द्रव्यगुणविज्ञानम्'
अग्रेसरं नूनं वर्तते)। एतद्विषये ये मदाज्ञया कपिलवर्ण
नूतनचर्ममयचिक्कणशोभनबन्धनालङ्कृतेन श्रीमदमरकोषेण

पर्यायशब्दा निर्दिष्टा भवन्ति, ते समाधिकतममुपयोज्या अपि भवन्ति। अपि यौ ग्रन्थस्वदीयेन कुशीलकेन प्रातिवेशिकेन रात्रिमेकां समर्प्यते स्म, यस्मिन्न ग्रन्थ आवाभ्यां पठ्ते (ईसवीय) वर्षे संस्कृतविश्वविद्यालयस्याऽऽयुर्वैदिकविभागे 'श्रीरचम्पकः' इति शब्दनिर्देशः प्राप्यते स्म, तावेवेदानीमपि प्रकाशितौ भवतो न वेति न जाने। स्वीकारे सति, तयोः (अन्यस्य सदृशस्य नूतनग्रन्थस्य वा) प्राप्तिरतिमनोरोचका मे भवेत्, यतः सर्वेषां परस्परपूरकत्वं वर्तते, तद्ग्रन्थकृताञ्च कश्चिन्मतभेदो कदाचिद्विराजते, यथा ज्योतिष्मत्याः प्रियङ्गोश्च मुख्यार्थविवरणविषये।

अनुसन्धानेच्छेयं वनस्पतीन् प्रति महास्नेहादुद्भिन्ना भवति, तद्द्रव्याणां च मनोरञ्जनत्वात्। वसुधातले ते ज्योतींषीव प्रतिभान्ति। ज्योतिर्वत् तेऽपि बहुप्रभावान्विताः प्रतीयन्ते। यथा मदीयविवाहकाले फ्रान्सदेशदक्षिणभागे रथभ्रमणावसरे मया दुर्घटनाभयेऽपि रथः सहसा स्थापितोऽभूत्, मार्गप्रान्ते वनयमानीं दृष्ट्वा। पश्चादहं तस्या दुर्गन्धिलोमशपत्राणि मञ्जूषायां नौ सावधानं निक्षिप्तवान्। पत्न्यास्तदानीन्तनं विस्मयमनुमिनोषि, मन्ये!।

वक्रापक्रत्वनिवेदनेन — किन्तु मयान्यथा कथं कर्त्तव्यमभूत्? — विषण्णीकृतानां भगिन्या भागिनेयानां च सुहृदां च विनोदं कथेयं जनयिष्यतीत्याशंसे। समापनसमये च सुखानि सर्वेषामपि शुभदेवता वितरन्तु। भवत्स्नेही भ्राता - मातुलः - शिष्यः - स्यालश्च

५-११-७८ को उत्तरित

॥ श्रीगणेशाय नमः ॥

फाल्गुनशुक्लद्वादश्याम्, सोमवारे
वै० २०३७

docteur philippe vouin
secteur psychiatrie-adultes lozère-est
48120 saint alban sur limagnole

प्रेष्ठ गुरुदेव !

लिमूनगरतः (तत्र संगीतचिकित्सा [musicotherapy] - संगीतेन शब्दप्रयोगेन च मनोरोगिणां चिकित्सेति भावः - सम्भाषापरिषद् एकस्या विषयोऽभूत्, यस्मिन्नेव मयाऽन्तेवासिरूपेण भागो गृह्यते स्म) प्रत्यावृत्तेन मयेवाश्रूयते स्म, यत् तव श्रीमत्याश्च कथ्रीण्-ओब्रियोनाम्न्या वाराणस्यामेव मेलनं पुनस्तथा संवृत्तम्, यथा मत्साक्षिकं १९७६तमे ख्रीष्टाब्दे पूर्वमेवाऽभूत् (प्रथमसाक्षात्कारे नौ)। तया सह दर्शनं कतिचिदहोरात्राणि मम भविष्यति, यतः सप्ताहान्ते तदीयस्य देवरस्य गृहेऽहमागमिष्यामि, यत्रैव सा ह्रस्वं संक्रमणं करिष्यति। एवं सति कथ्रीण्मुखतो मेलनं वां मया विस्तरेणाऽऽकर्णयितुं शक्यते नूनम्, यदेव प्रमोदास्पदं मे भविष्यति।

अयं देवरः पिनाकीवादकोऽस्ति (violonist)। तद्विषये पूर्वमेव त्वदर्थं विगतभाद्रपददर्शान्ते लिखितमभूत्। द्वावुभौ नादलुब्धौ कदा कदा कक्षावादनं (chamber-music) सहैव वादयावः। कष्टं स इतो दूरवर्तिनि नगरे निवसति, ततो मेलनं नौ विरलमेव भवति। तद्गृहे सप्ताहं यावत् स्थास्यामि। मदीयप्रवासद्वयान्तराले समयो मे दीर्घलेखविरचनार्थमपर्याप्तं भवति। तत् क्षम्यतां कृपया। मत्पक्षतो विस्मरणचिह्नमौदासीन्यचिह्नं वाऽत्र मा नाम पश्य !। अन्यत्, सार्धसंवत्सरात्प्रभृति पण्डितारामकोशरचनया पुष्कलः कालोऽपेक्ष्यते मत्पार्श्वे, अन्येषाम् अवैयवसायिकानां व्यापाराणां हान्यै। रचनेयं सुखकारि कार्यं शब्दतो नास्ति, यतस्तत्साफल्यं प्रत्यक्षं न

प्रकाशते, शनैः शनैश्च केवलं निर्मीयते। किन्तु, भो मित्र! मत्पार्श्वे कश्चिदनुतापो न वर्तते, इति त्वं जानासि वै, अस्मिंश्च विषये संशयोलेशोऽपि ममाऽपराध्नुयात्। परन्तु, मया तत्समापनार्थमनेके छायना अप्यपेक्षिष्यन्ते खलु, यथा त्वं तत्स्थूललेख्यं दृष्ट्वाऽग्रिमकाशीगमनावसरे मे प्रत्यक्षीकरिष्यसि।

सर्वेषामपि हिताकाङ्क्षी त्वदीयः शिष्यः

॥ श्रीगणेशायनमः ॥

The sage Marichi blessed the two: "A heavenly future waits for you, Your life shall sail, a fairy tale, beneath a sky forever blue, Young Bhaarat's name shall bring high fame to Bhaarat, crowning her a queen". Possessing streams that bear the dreams of fruited trees and harvest green". Great Bhaarat born to Dushyant & Shakuntala.

ऋषि मरीचि दे रहे अभय, सौभाग्य, स्नेह, मंगल-आशा;
मिला दिया जिस भांति, करेंगे पूरी प्रभु हर अभिलाषा;
और भरत से यही राज्य, होगा भारत सुजला-सुफला-
नृप दुष्यन्त पिता हैं जिसके, मां है जिसकी शकुन्तला।

सैण्ट्-अल्बाँ

वर्षस्योपान्तिमदिवसे, वै० २०४५
भौमवासरे

प्रेष्ठगुरुदेव !

दिष्ट्या, तात्कालिकबौद्धिकतमोदशायां समाप्तायां मया संस्कृतमयीं रचनां कुर्वता महाप्रीतिः पुनरनुभूयते । एतदवसरे यन्मे साहाय्यकं भूयिष्ठेन विदधाति स्म, तदेवास्य संस्कृतसम्भाषणाख्यपुस्तकस्याध्ययनमभूत्, यत् प्रस्थानदिवसे श्रीवासुदेवद्विवेदगुरुवहाररूपेण दत्तवान् । तदा तदर्चनीय-हस्ताभ्यामस्य चित्रालोभिनः पुस्तककूर्चस्य ग्रहणमङ्गीकृत्य नानुमिनोमि स्म, यावत् स फ्राँस्-देशे प्रत्यावृत्य संस्कृताभ्याससमर्थतापुनर्लाभायानुकूलो मे भवेत् । इदं ज्ञात्वा श्रीवासुदेवद्विवेदी स्वशिष्याश्च प्रसीदेयुस्तमां मन्ये । तेषामत्र नूनं नितान्तं कृतज्ञतां निवेदयामि । अन्यच्चैतत्पुस्तकस्य पठने-नाहं भारतीयानामाचाराणामुपवर्णनेकनिर्देशान् सानन्दं दृढीकरोमि, यानेवान्तिमप्रवासे पूर्वमेव साक्षात्करोमि स्म (यथा पारिवारिक-मैत्र-गौरव-शैष्यादिसम्बन्धानां विषये) ।

अहं गतासुरेज्यवासरे भवदन्तिकं वर्णचित्राणामुत्तमानि द्विधाकृत्य (तद्भा-रहेतु) प्रेषितवान् । आशंसे, भवन्तस्तान्येतत्सप्ताहान्ते (अग्रिमसप्ताहाभ्य-न्तरे वा लप्स्यन्ते । अत्रैवैतानि दृष्ट्वा हृदये मे भृशाऽऽर्द्रीभावो जायते स्म । यथा भवद्भिर्द्रष्टव्यं भविष्यति, वक्रादि तत्र (चित्रसंग्रहे) मेलयते ! ।

अद्यापि मातुष्कृते शल्यकर्मदिवसो निश्चितो नास्ति ।

पत्रस्यैतस्य ह्रस्वतैव क्षमितव्या । यथाहं प्रारम्भिककष्टस्याङ्गीकरणेन मां प्रति भवतां चिन्तां ददामि स्म, तथाद्य मदीयलाभस्यांशं भवतो ग्राहयितुमिच्छामि स्म । सर्वेषामपि हितैषी भवदीयो नाक्षत्रनूतनहा-यनावसरे भवदर्थं कोटिशो मङ्गलवादी,

Philippe

(1) पारयातील एद्य हॉन्यॉगुल उद्यैलो यक्षा - तुन्दर्त एलउज़ोत एश एद्य ऐस्तैन्दोरे एल इश इतल्त ज़ोर्द उरानॉक पॉरॉन्चा। एलमैन्त हात, हौद्य ऑ रैमते - तॉन्यान, सेप सीता सैन्त वीज़नैल लोम्बतोल हूश रायॉगिरी तैतेयन ब्युनतैतेशेत लैतलतचै।

(2) एद्य इश्तैन - ऑत्सु हैद्यैत ओरिज़ एसॉक,
हिमालॉयात, ऑ हैद्यैक ओश किरायत।
केत ओलियान कज़्त, कैलैत एश न्यूगॉत कज़्त
तोरान्यलिक एगनैक फैयैदैल्मी ओरमा।

(3) सैकफ्यु विरण लैहैलैत ज़ुहॉ तॉगॉश - अरम इल्लॉतु देलवी सेलबैन
फ्युलैमिलैसॉतु कुसॉ मैहज़ीजैगेशु तुगॉश शुर्शांगो शुरुयैबैन
हॉरी विगॉद ओ दयनअरु दॉलु किर्कलैतबैन,
शीरयन ऑज़ एलहॉद्यॉतोत, इमै तान्सोल ऑ वॉदअरअमु लाच्यकॉशैरंगबैन

Hungarian Verse Rendering of Sanskrit Poems

Satya Vrat Shastri

A beautiful country in the heart of Europe, Hungary has a long and glorious tradition of Indological studies. Quite a few of its scholars have enriched their literature with brilliant studies of old texts in Sanskrit as well as texts in other Indian languages. They also have enriched their literature with excellen t translations of some of the masterpieces of Sanskrit and other Indian Languages. Tran slations in Hungarian are now available of such works as the Vikramorvasiya, the Malavikāgnimitra, Abhijnanā-sākuntala, the Rtusamhara, the Meghaduta, the Raghuvamsa, the Kumārasambhava, the Dasakumaracarita, the Vetalapanca-vimsatika, the Pancatantra, the Hitopadesa, the Gitagondia, the selections from the Ramayana, the Mahabharata, the Kathasaritsagara an d so on. One of the peculiarities of these translations is that verse is rendered in them in verse and prose in prose. Not only that. Even in translation original Sanskrit metre is preserved. Sanskrit works have been translated in many languages of the world but, in no case along the above lines. They in translation have either free verse or some modern metres like ode, sonnet and so on. Hungary ~~here~~ with regard to this has accomplished something unique. The Mandakranta of the Meghaduta of Kalidasa continues to figure even in Hungarian. So also continues to figure in it typical Sanskrit rhythms like the Laya of the Astapadis of the Gitagovinda. It is a treat to go through Hungarian stanzas in Upajati, Vamsastha, Vasantatilaka Malini, Sardulavikridita and ~~so on.~~ other metres.

Contd...

It is not only the original metre that is preserved in Hungarian translation, the original idea too is rather faithfully carried in them. There are departures from it here and there but they are not wide enough to make the two, the original and the translation, look far apart from each other. These could well be a part of any normal translation particularly in the backdrop of the different geopolitical and social backgrounds of Hungary and India.

A word is due here in explanation for the super excellence achieved by Hungary in translation which owes itself to a lengthy procedure followed by it. The procedure is as follows: First a work is entrusted to an individual translator for translation. He prepares the draft which in the second stage is placed before a board of experts that takes it up for a minute word to word examination.

In the final stage it is looked into by a well-known authority in a particular literary form, a poet, a playwright, an essayist, a critic etc. who examines it purely from the point of the particular literary form. He may not know the language. He will ~~only~~ examine it from the point of view of the requirements of the literary form.

Enough upto now has been said about the quality of the translation. Let us not go on with this longer. The proof of the pudding lies in eating. Let us reproduce a few specimens of Hungarian translations, together with their Sanskrit originals, and let the learned friends ~~present here~~ judge for themselves as to how beautiful they have turned out to be.

It is not only the original metre that is preserved in Hungarian translation, the original idea too is rather faithfully carried in them. There are departures from it here and there but they are not wide enough to make the two, the original and the translation, look far apart from each other. These could well be a part of any normal translation particularly in the backdrop of the different geopolitical and social backgrounds of Hungary and India.

A word is due here in explanation for the super excellence achieved by Hungary in translation which owes itself to a lengthy procedure followed by it. The procedure is as follows: First a work is entrusted to an individual translator for translation. He prepares the draft which in the second stage is placed before a board of experts that takes it up for a minute word to word examination.

In the final stage it is looked into by a well-known authority in a particular literary form, a poet, a playwright, an essayist, a critic etc. who examines it purely from the point of the particular literary form. He may not know the language. He will ~~only~~ examine it from the point of view of the requirements of the literary form.

Enough upto now has been said about the quality of the translation. Let us not go on with this longer. The proof of the pudding lies in eating. Let us reproduce a few specimens of Hungarian translations, together with their Sanskrit originals, and let the learned friends ~~present here~~ judge for themselves as to how beautiful they have turned out to be.

Meghadūta (Verse 1)

kascit kāntāvirahagurunā svādhikārāt pramattah
sāpenāstangamitamahimā varsabhogyena bhartuh /
Yaksas cakre janakatanayāsnānapunyodakesu
snigdhacchāyātarusu vasatim ramagiryāsramesu //

Hungarian translation

Párjától egy hanyagul ugyelo jaksa-tundért eluzott
és egy esztendore el is itélt zord urának parancsa
Elment hát, hogy a remete-tanyán, szép Szitá szent vizénél
lombtól hus Rámagiri tetején buntetését letöltse.

English translation

A certain Yaksa having failed in his duty, and his master's curse, which was to be borne for a year and which appeared oppressive on account of the separation it entailed from his wife, having put an end to his powers, he made his home in the hermit-dwellings of Rāmagiri, where the shady trees were lovely and the water holy, because the daughter of Janaka, Sītā, had bathed there.

Kumārasambhava (Canto I, Verse 1)

asty uttarasyām diśi devatatma
Himālayo nāma nagādhirājah //
purvāparau toyanidhī vagahya
sthitah prthivyā iva mānadandah //

Hungarian translation

Egy isten-arcú hegyet oriz Észak,
Himálaját, a hegyek os királyát.
Két óceán kozt, Kelet és Nyugat kozt
toronylik égnek fejedelmi orma.

---

docteur philippe vouin

secteur psychiatrie-adultes lozère-est

48120 saint alban sur limagnole

॥ रौद्राणेशाय नमः ॥

कार्तिकवदिदशम्याम्,
रविवासरे, वै० २०३७

प्रेष्ठ गुरुदेव !

पिप्पलपत्रोपर्यालिखितं सुरुचिरं श्रीगणेशचित्रं कार्तिकवदितृतीयायां समधिगतम्, यद्विषये -वरिष्ठ मित्र ! - हृदयस्था मे कृतज्ञता प्रकटितव्या भवति मुहुर्मुहुः। सदा पत्राणि ते क्रियावन्ति बलप्रदौषधानीव मनसि फलं साधयन्ति, तेषाञ्च महत्यध्यापनात्मिका शक्तिर्नानाविधेषु विषयेषु (पारिवारिकेष्वाध्यात्मिकेषु च प्राधान्यतः) सर्वदा विराजते। (अनुशोचामि केवलम्, यत्त्वया शारदीमन्दिराङ्गनूत्नतालीतन्त्रीवाद्योपरि विशेषतः किञ्चिदाशीर्वादात्मकं नेदानीमपि लिखितमभूत् - इति सरलोक्तिरियं क्षम्यताम् (अपि भवद्भिस्तस्य मत्प्रेषितं वर्णचित्रं कदाचिन्न समधिगम्यते स्म ?)। एवंवादिनो मत्तो बालिश्यं नास्ति। विचार्यतां कृपया, वाद्यमिदमिह संवादकभूतो ममास्ति, ततस्तस्योपस्थितिर्महत्त्वपूर्णा लक्ष्यते। अन्यतत् सरस्वतीभवनरूपेण विभासते।

यतस्त्वन्निर्दिष्टानुसारेण फ्रांस्देशीयमध्ययनं भारतेऽङ्गीक्रियते, ततः श्रीमद्वाचस्पतेः फ्रांस्देशीयविद्यालयप्रवेशनसम्भवं प्रति पृच्छामि। अस्मिन्नेव ग्रामे विद्यालय एकस्तिष्ठति, यो ब्रह्मवादिनीभिः सेर्-मरि-लूईस्-सुहृद्भिः संचाल्यते। किन्तु, मन्ये, पूर्वं फ्रांस्भाषाज्ञानमत्यावश्यकं भवति, मा तत्रत्यमध्ययनं फलविवर्जितं परीक्षाप्रवेशश्च प्रतिषिद्धो भविष्यतः। औपम्येन, ये वैदेशिकाः छात्राः फ्रांस्देशीयविश्वविद्यालयेष्वधीषिषवो भवन्ति, तेषामेव फ्रांस्भाषाविषये काचित्प्रावेशिकी पूर्वपरीक्षानिवार्या साम्प्रतं प्रचाल्यते। इयं दिष्ट्या वाचस्पत्यर्थमिदानीं नास्ति। अपि तु तेनाध्ययनप्रमाणपत्रं प्राप्तुं शक्येत, यदि स्वीयं फ्रांस्भाषाज्ञानमपर्याप्तमभिज्ञायेत ? । अन्यत्, स तदा प्रौढभूतो यवीयोभिः कुमारैः सहाऽधीत्य कदाचित् कष्टमनुभवेद् ग्लानिं विहाय। प्रमाणं त्वम्। यदीच्छसि, तर्हि फ्रांस्भाषामूलानि वाचस्पतिमध्यापयितुं पूर्व-

Meghadūta (Verse 1)

kascit kāntāvirahaguruṇā svādhikārāt pramattah
sāpenāstangamitamahimā varsabhogyena bhartuh /
Yaksas cakre janakatanayāsnānapunyodakesu
snigdhacchāyātarusu vasatim ramagiryāsramesu //

Hungarian translation

Párjától egy hanyagul ugyelo jaksa-tundért eluzott
és egy esztendore el is itélt zord urának parancsa
Elment hát, hogy a remete-tanyán, szép Szitá szent vizénél
lombtól hus Rámagiri tetején buntetését letöltse.

English translation

A certain Yaksa having failed in his duty, and his master's curse, which was to be borne for a year and which appeared oppressive on account of the separation it entailed from his wife, having put an end to his powers, he made his home in the hermit-dwellings of Rāmagiri, where the shady trees were lovely and the water holy, because the daughter of Janaka, Sītā, had bathed there.

Kumārasambhava (Canto I, Verse 1)

asty uttarasyām diśi devatatma
Himālayo nāma nagādhirājah //
purvāparau toyanidhī vagahya
sthitah prthivyā iva mānadandah //

Hungarian translation

Egy isten-arcú hegyet oriz Észak,
Himálaját, a hegyek os királyát.
Két óceán kozt, Kelet és Nyugat kozt
toronylik égnek fejedelmi orma.

English translation

There is in the northern direction a divine king of mountains of the name of Himālaya which wading through the eastern and the western oceans stands like the measuring rod of the earth.

Gitagovinda

Astapadī 3 (Stanza 1)

lalitālavangalatāparisīlanakomalamalayasamīre
madhukaranikarakarambitakokilakūjitakunjakutīre /
viharati Harir iha sara sa vasante nrtyati
yuvatijanena samam sakhi virahijanasya durante //

Hungarian translation

Szekfuviráglehelet zuhatagos-oromillatu délovi szélben
fulemileszavu kusza méhzizegésu lugas susogó surujében
Hari vigad a gyonyoru dalu kikeletben
sírjon az elhagyatott, ime táncol a vadoromu lánykaseregben.

English translation

In the southern wind which has the fragrance of joy and which streams like the breath of a sweet-scented flower in the entangled thicket of a grove which is full of nightingale song and humming of bees.

Hari rejoices in the beautifully singing spring time.
The abandoned one should weep
He dances in the wildly rejoicing crowd of girls.

Astapadī 4 (Stanza 3)

pīnapayodharabhārabharena Harim parirabhaya sarāgm /
gopavadhūr anugāyati kācid udancitapancamarāgam //
Harir iha mugdhavadhūnikare vilāsini vilasati kelipare /

Hungarian translation

Ezt oleli: mint buja rengedezo teli furt borul a kebele rája,
mámorosan tovaleng vele, zengi a pancsama-utemet utána;
Hari maga vezeti a tánc-dobogást,
a lányokat, a tavaszi játszadozást.

English translation

This one embraces him, her breast drops on him
like a voluptuous trembling full grape bunch
He ecstatically glides away with him resounding
the Pancama rhythm
Hari himself leads the dance throbbing,
the girls and the spring time play.

Astapadī 11 (Stanza 3)

patati patatre vicalati patre sankitabhavadupayānam /
racayati sayanam sacakitanayanam pasyati tava panthānam //
dhīrasamīre yamunātīre vasati vane vanamāli /

Hungarian translation

Ha madár rebben, ha levél lebben: azt hiszi, kozeleg a lépted
Gyujt avar-ágyat, nézi a tájat: várhat-e végre ma téged?
Hus bereg alján, Jamuná partján, koszorúsan egyre terád vár.

English translation

When a girl suddenly flies up,
When the leaves flutter, he thinks her steps are nearing
She collects a leaf-bed, watches the countryside,
may she expect you today at least?
Under cool bushes, on the bank of the Yamunā
adorned with garland he always waits for you.

Astapadī 12 (Stanza 5)

tvaritam upaiti na katham abhisāram /
Harir iti vadati sakhīm anuvāram //
nātha Hare sīdati Rādhā vasagrhe /

Hungarian translation

A kegyesem eljon-e? Hari, Hari, hol vagy?
-kérdezi egyre s a búban elolvad.
Ó, Hari úr, Rádhá ott a lugasba simul.

English translation

Whether my beloved comes or not?
Hari, Hari, where are you?
She asks continuously and melts in sorrow
Ah Lord Hari!
Rādhā is hiding there in the garden.

Astapadi 4

pīnapayodharabhārabhareṇa Hariṁ parirabhaya sarāgam /
gopavadhūr anugāyati kācid udañcitapañcamarāgam //
Harir iha mugdhavadhūnikare vilāsini vilasati kelipare /

Hungarian translation

Ezt öleli: mint buja rengedező teli fürt borul a kebele rája,
mámorosan tovaleng vele, zengi a pancsama-ütemet utána;
Hari maga vezeti a tánc-dobogást,
a lányokat, a tavaszi játszadozást.

English translation →

Astapadī 11

patati patatre vicalati patre śaṅkitabhavadupayānam /
racayati śayanaṁ sacakitanayanaṁ paśyati tava panthānam //
dhīrasamīre yamunātīre vasati vane vanamāli /

Hungarian translation

Ha madár rebben, ha levél lebben: azt hiszi, közeleg a lépted.
Gyüjt avar-ágyat, nézi a tájat: várhat-e végre ma téged?
Hűs bereg alján, Jamuná partján, koszorúsan egyre terád vár

English translation →

Astapadī 12

tvaritam upaiti na katham abhisāram //
Harir iti vadati sakhīm anuvāram //
nātha Hare sīdati Rādhā vāsagṛhe /

Hungarian translation

A kegyesem eljön-e? Hari, Hari, hol vagy?
-kérdezi egyre s a búban elolvad.
Ó, Hari úr, Rádhá ott a lugasba simul.

English translation

Astapadi 4

pīnapayodharabhārabhareṇa Hariṃ parirabhya sarāgam /
gopavadhūr anugāyati kācid udañcitapañcamarāgam //
Harir iha mugdhavadhūnikare vilāsini vilasati kelipare /

Hungarian translation

Ezt öleli: mint buja rengedező teli fürt borul a kebele rája,
mámorosan tovaleng vele, zengi a pancsama-ütemet utána;
Hari maga vezeti a tánc-dobogást,
a lányokat, a tavaszi játszadozást.

English translation →

Astapadī 11

patati patatre vicalati patre śaṅkitabhavadupayānam /
racayati śayanaṃ sacakitanayanaṃ paśyati tava panthānam //
dhīrasamīre yamunātīre vasati vane vanamālī /

Hungarian translation

Kurukshetra University

Kurukshetra

प्रारम्भिकपद्यानि

शुक्लाम्बरधरां शुक्लां वीणापुस्तकधारिणीम्।
भक्तक्षेमङ्करां नित्यं वाग्देवीं प्रणमाम्यहम्॥१॥

विश्वेशं सच्चिदानन्दं वन्देऽहं योऽखिलं जगत्।
चरीकर्ति बरीभर्ति सञ्जरीहर्ति लीलया॥२॥

तीर्थे कुरुक्षेत्रमिति प्रसिद्धे
सम्मेलनं प्राच्यविदां बुधानाम्।
इदं समायोजितमित्यतोऽहं
हर्षस्य कोटिं परमां गतोऽस्मि॥३॥

सत्स्वप्यनेकेषु सुविश्रुतेषु
तीर्थेषु राजानति तीर्थमेतत्।
नक्षत्रताराग्रहसङ्कुलाऽपि
ज्योतिष्मती चन्द्रमसैव रात्रिः॥४॥

नाना स्थलेभ्यः समुपेयिवांसो
ज्ञानप्रभोद्भासितदिग्दिगन्ताः।
प्राचामपाचां विदुषां सुवाचा-
माचामका धन्यतमा भवन्तः॥५॥

परस्परं ज्ञानविपर्ययेण
कल्पेत भूयान् विषयावबोधः।
योऽलं भवेद् ज्ञानविवर्धनाय
वयं यदर्थं समुपागताः स्मः॥६॥

इत्येतदुक्त्वा सुरवाक्प्रियोऽपि
सुखाय तज्ज्ञानविवर्जितानाम्।
गीर्वाणवाणीं परिहाय पुण्यां
वाचाऽऽङ्ग्लानां स्ववचो वदामि॥७॥

Hon'ble Prime Minister of India, Hon'ble Chief Minister of Haryana, Hon'ble Vice-Chancellor, Prof. Satish Jha, Prof. Shuk Deva Sharma, Prof. Ranvir Singh, Prof. Bhim Singh, Members of the Executive Committee of the Oriental Conference, Members of the Faculty and the Alumni of the Kurukshetra University, Fellow Delegates and Distinguished Invitees,

It is a great pleasure for me to be present on the occasion of the inauguration of the 44th Session of the All India Oriental Conference, the premier representative body of Orientalists of India. It is a matter of further pleasure that the Session is being held at Kurukshetra where I had spent the early period of my life. It was on 2nd November, 1957 that I had joined the Kurukshetra University as Senior Lecturer shortly after its coming into being. Sanskrit Department was the first to have been set up here and I was the first one to join it. I am, therefore, the first teacher of this University, a fact that I always cherish. I am grateful to God Almighty that He allowed me to see for myself the progress of this University. There may not be many who have the opportunity to witness the growth of the institution which they had once been part of from its inception to the completion of its fifty years. With the humble beginning of some twenty students and five teachers the University has grown into an institution of seven thousand three hundred and forty six students and about five hundred teachers. I am a witness to its progress both in numbers and stature. It is at present one of the premier educational institutions of India.

Kurukshetra is a place which has a halo going with it. It was here that Lord Kṛṣṇa had delivered the sermon to Arjuna in the battlefield when he was stricken with debilitating depression on noticing his kith and kin arrayed against him in a fight to the finish. The sermon is now a part of the world heritage. It has galvanized countless millions as it had done earlier the doughty warrior fallen in low spirits.

It may come as surprise to most of us, especially of the younger generation, that the Kurukshetra University originally was conceived as a Sanskrit University, the *reason d' etra* of its being set up here, it being a place associated with the

Bhagavadgītā that starts with its mention as a holy place , *dharma-kshetra*, to silence the critics who were averse to the setting up of an educational institution of the stature of a University at a place like Kurukshetra which lacked the infrastructure and the feeder institutions which places like Rohtak and Ambala had and had, therefore, a better case for the setting up of a University. I very vividly remember the meeting held in the assembly hall of the Birla temple at Kurukshetra –I was present in the meeting—in the evening of the very day of the laying of the foundation of the University under the chairmanship of Dr. K.M. Munshi, the then President of the Vishva Sanskrit Parishad. The meeting had passed a resolution felicitating the Govt. for setting up a Sanskrit University at Kurukshetra. This idea of the Sanskrit University, it seems, got lost somewhere on the way. We now have in its place a multi-faculty University, like others of the kind in the country. It will be in the fitness of things if the University were to accord Sanskrit the stature of its major discipline –that is the minimum expected of it– to honour the noble intent of its founding fathers.

मोदन्वत्सट्ठिकायां श्रीहरमुकुट
पर्वतप्रान्ते ।ईशासं° १९८२।३।१९

श्रीसरस्वतीप्रसादपात्रीभूतसर्व
सद्विद्वज्जनगुणभूषितश्रीपण्डित
नित्यानन्दशास्त्रिमङ्गलाभिधाय:
डाक्टर. म° औरेल्. स्टैनस्य सवि
नयपूर्वकां स्वस्तिवादभरितामियं
विज्ञप्तिं दृग्गोचरीकुर्यात् ॥

भवद्धस्तकमलचित्रितां
वर्धापनवादसूचकां सौशील्य
मैत्र्यसंबन्धप्रबोधकां पत्रिकां दृष्ट्वा
मया महां संतोषोऽनुभूतः॥ तत्कर
णीभूतस्य भवदादरस्याहं संयक्
कृतज्ञोऽस्मि । इति निश्चयो धार्य:॥

उत्तरदानविलम्बस्य स एकाकी
हेतुर्यन्मया कार्यबाहुल्यभरितेन
बहूनां मित्रलिखितपत्राणां प्रवाह
वशादेतेषु दिवसेष्वधिकश्रमोऽनु-
गतः॥

यद्भवता मीसैन् साद्विनाय-
स्वपुस्तकं प्रेषितं तस्य तु योग्य
फलमवश्यं प्रादुर्भविष्यतीति
न संशयः॥ तेनच मया च समकाले
राजाधिराजप्रसादात्सममपदवी
समवाप्ता॥ भवदर्थं श्रीवोमेल-
साद्विनेनापि पत्रद्वारेण स्वस्ति
वादो विशिष्टः एव प्रेषितः॥

भवच्छ्रमं सदैव सफलीकुर्यात्
स्वास्थ्यं च प्रदद्याच्छ्रीशारदा॥

म० आरेल, स्टैन:॥

श्री विद्वद्गणशिरोमणि सर्वसद्गुणालंकृत श्रीमहापण्डित
नित्यानन्दशास्त्रिणे सिर् औरेल् स्टैनाभिधः
समग्रादरभरित स्वस्तिवादं पुरःकृत्येममर्थं निवेदयति॥
महानेव मदीयः संतोषोऽभूदनुगत्य मन्मित्रवराश्री
विन्टेर्निस् साहिबवर्यद्भवता महाभारतग्रन्थानाम्
न्वेषणविषये साहाय्यविधानं सम्यगङ्गीकृतम्॥
संपूर्णा मदीयाशा वर्तते यद्भवद्भ्रमसाफल्यमपि
तस्मिं विषये संभूतमेव श्रीशारदानुकम्पेन॥
द्वित्रिदिवसेषु तस्य विद्वद्वरस्य प्रत्यागमः श्रीप्रवरपुरे
संभविष्यति। तदाहं भवद्धस्तकमलाद्यादेशं प्राप्य
पुस्तकसंग्रहविषयेऽतिशयेन कृतज्ञो भवेयम्॥ इत्यलं॥
श्रीसरस्वती सदैव पालयेद्वर्धयेच्च भवन्तम्। इति शं॥

मोहन्दकमठिकायाम्। १०२३॥६।७

A. Stein

1A3

स्वस्ति:

मह[illegible]ार्युभयोरुपस्थियोर्ग्रामयोरागते
स्वनुचराच्छ्रुत्वा ह्योदिने मया डक्टर् मित्रः
पृष्टः किं कर्तव्यमिति । तस्योपदेशोऽयम् ।
अत्र ततो गन्तव्यम् । नगरसमीपे भयं ना
स्तीति । तथावां मुनशीबागोद्यान आगतौ ॥

श्वोदिने पञ्चम्यां होरायां यदि भवाना
गमिष्यति तदोपस्थितो भविष्यामि । प्रति
दिनं च तत्काल उपस्थास्यामि । सर्वदा तत्र
भवतो दर्शनाद्धर्षो जनिष्यते । दार्शपौर्णमा
सिकानि श्रोतुमिच्छेयम् ॥

श्रीनगरे ।
१।९।०१ ॥

A. W. Sha[illegible]

यत्पुस्तकं दर्शपूर्णमासेष्टियागमुद्दिश्य युष्मत्सा
शे वर्तते यदि पश्येयं प्रकर्षेण हृष्टो भवेयम् ॥

A. W. S.

I(iii) I(c) I(C)I

श्रीशः प्रसीदतु

काश्मीरदेशस्य विद्वज्जनतिलकभूत-
सकलशास्त्रपारगत समस्तशुभगुणगणालंकृत-
श्रीनगर श्रीवर्धन श्रीनित्यानन्दशास्त्री ति यथार्थनाम-
पण्डितवरेषु होलन्ददेशीयो भागालयसंज्ञो
ज्ञानार्थी स्वस्तिवादेन वन्दयित्वा विज्ञापयति।

अस्ति गिरीशभूषणभूतश्चम्बानामातीव-
रमणीयः प्रदेशः। तत्र कस्मिंश्चिच्चामुण्डादेवी-
प्रासादप्रसादिने स्थाने प्राचीनशिलोपाधारो वर्तते।
अतिजीर्णशिलापट्ट लिखित शारदालिप्यक्षर शोभना-
लङ्कारकृत विशेष विशेषितात्यन्त रम्य प्रशस्तिश्चैव
विद्यते। अस्याः प्रतिबिम्बं च देवनागरीलिपि
लिखितां चैव कापीं भवतः समीपं प्रेषयामि।
किमर्थं। पण्डितवरेण संस्कृतभाषाकुशलतया
शिलापट्टमप्याद्भिन्नं
यद्यदस्यां प्रशस्त्यां

1(iii) 1(c) 1(c)1

श्रीशः प्रसीदतु

काश्मीरदेशस्य विद्वज्जनतिलकभूत-
सकलशास्त्रपारगत समस्तशुभगुणगणालंकृत-
श्रीनगरश्रीवर्धनश्रीनित्यानन्दशास्त्रीति यथार्थनाम-
पण्डितवरेषु होलन्ददेशीयो वागालयसंज्ञो
ज्ञानार्थी भक्तिवादेन वन्दयित्वा विज्ञापयति।

अस्ति गिरिशभूषणभूतश्चम्बानामातीव-
रमणीयः प्रदेशः। तत्र कस्मिंश्चिच्चामुण्डादेवी-
प्रासादप्रसादिते स्थाने प्राचीनस्तोत्याधारे वर्तते।
अतिजीर्णशिलापट्टलिखितशारदालिप्यक्षरशोभना-
लङ्कारकृत विशेषविशेषितात्यन्तरम्यप्रशस्तिस्तत्रैव
विद्यते। अस्याः प्रतिबिम्बं च देवनागरीलिपि
लिखितां चैव छायां भवतः समीपं प्रेषयामि।
किमर्थं। पण्डितवरेण संस्कृतभाषाकुशलतया
यद्यदस्यां प्रशस्त्यां शिलापट्टभङ्गाच्छिन्नं

1(c)2

स्यात्तत्संभावितत्वं निश्चितत्वं चेति मम परमाशा वर्तते । सुष्ठु हि केनचिदुक्तं हनूमानब्धिमतरद्दुष्करं किं महात्मनाम् । अद्यापि मे हृदय एषाशा परमास्ति शीघ्रमेव चित्रवरिष्ठाननेन्दुदर्शनेन लोचन-कुमुदं मे विकस्वरं भवेदिति शुभम् ॥

2- Page 138-139
Modern Sanskrit Literature

1(c)2

स्यात्तत्संभावितव्यं लिखितव्यं चेति मम
परमाशा वर्तते । सुहृ हि केन चित्तं
हनूमानाब्धिमतरद्दुष्करं किं महात्मनाम् ।
अद्यापि मे हृदय इयमाशा परमास्ति
शीघ्रमेव मित्रवरिष्ठाननेन्दुदर्शनेन लोचन-
कुमुदं मे विकस्वरं भवेदिति शुभम् ॥

2 - Page 138-139
Modern Sanskrit Literature

(5) *रयेण तुल्या व्यतियान्ति वत्सराः*
जरावशं यौवनमाशु नश्यति।
अलं शुचा किं परिदेवनैर्गुरो!
क्व देहराहुः क्व यशःसुधाकरः।।

सेण्ट् पीटर्स्बर्ग संस्कृतजर्मनकोशः संस्कृतोपासकानां सुपरिचित एव। तस्य सङ्कलयितारौ रोथाख्यो बोथलिङ्क्आख्यश्चेति द्वौ पण्डितौ। तयोर्बोथलिङ्क् पण्डितस्य जन्मदिनावसरे कोवल्पण्डितेन तं प्रति प्रेषितमेकं पद्यम्। ततः प्राक् कोशकार्यं समाप्तमभूदिति तस्यापि विशेषतो निर्देशस्तेन विदुषा कृतः—

(6) *यशः श्रमेणैव नरैरुपार्ज्यते*
श्रमेण कोषोऽपि समाप्तिमाप्तवान्।
श्रमे व्यतीते वदते (वदिः परस्मैपदी वदतीत्येव साधु) सरस्वती
ध्रुवं सः कोषोऽप्यमरो भविष्यति।।

अत्र अमरशब्दे श्लेषो निपुणमुपन्यस्तो विदुषां भूयसे मोदाय स्यात्। अज्ञातनाम्ना केनाप्याङ्गलकविना रचितानीमानि स्वभाषया कानिचन पद्यानि—

(7) *Thou hidden love of God whose height*
Whose depth unfathomed so mine knows
I see from far thy beauteous light
Only I saw far thy repose
My soul is sick, nor can it be
At rest till it find rest in thee

पद्यानीमानि कोवल्पण्डितेन संस्कृतेनेत्थमनूदितानि—

(8) *यस्योच्चत्वमगाधतां च न जनो वेदामितां दूरतो*
ज्योतिस्सुन्दरमस्य गूढभगवत्स्नेहोऽहमीक्षे तव।
शान्त्यै तेऽन्तरहं विनिःश्वसिमि हा खिन्नो ममात्मा त्वयम्
शान्तिं लब्धुमलं न यावदयतां नो शान्तिमेष त्वयि।।

केपैल्लर्नाम्नाऽपर आसीदेकः शर्मण्यदेशीयो विद्वान् येन यवनशतकमिति नाम्ना होमरादीनामनेकेषां ग्रीककवीनां शतं पद्यानि संस्कृतेनानूदितानि। अनुवादेऽपि तादृशः प्रवाहः स्वारस्यं च तेषु येन स्वरचितानीव तानि प्रतिभान्ति। दिङ्मात्रतया कानिचिदेव अत्रोद्ध्रियन्ते।

होमरकवेः पद्यानां संस्कृतानुवादः—

:: 1 ::

यादृशानि हि पत्राणि तादृशाः सन्ति मानुषाः।
यथा पत्राणि वृक्षेभ्यो निपतन्ति महीतले।।
रोहन्ति च पुनर्वातैः प्रेर्यमाणानि माधवैः।
एवं कुलानि जायन्ते विनश्यन्ति च देहिनाम्।।

:: 2 ::

न हि कश्चिज्जनो दैवमतिवर्तितुमर्हति
क्षुद्रकः स्यादुदारो वा जन्म यो लब्धवान् भुवि।।

:: 6 ::

अनग्निमनिकेतं च कुलघ्नं विद्धि तं नरम्।
यो वैरं रमते कुर्वन्नैकराष्ट्रनिवासिनाम्।।

:: 4 ::

न हि प्राणिषु सर्वेषु महीतलविसर्पिषु।
शोचनीयतरः कश्चिन्मनुष्यादिति मे मतिः।।

:: 5 ::

सूक्ष्मा जिह्वा बहून्यस्यां विविधानि वचांसि च।
यादृशं तु भवेदुक्तं प्रत्युक्तमपि तादृशम्।।

:: 15 ::

पितृपैतामहे स्थाने यत्सौख्यं हृदि जायते।
न तद्देशान्तरे लभ्यं विभवेषु महत्स्वपि।।

थियोक्रिटिसकवेः पद्यानां संस्कृतानुवादः—

:: 66 ::

मा विषादं गमस्तात श्वो हि श्रेयो भविष्यति।
आशा धारयति प्राणान्मृता एव निराशकाः।।

:: 100 ::

द्रुमाणां तुहिने कष्टं निम्नगानामवर्षणम्।
पाशबन्धो विहङ्गानां श्वापदानां च वागुरा।।
यूनो मृगदृशां चिन्ता भगवन् बलसूदन।
नाहमेकः सकामोऽस्मि नारीसक्तो भवानपि।।

रूसदेशे लेनिनग्राडनगरे कल्यानोव्नामाऽस्ति विद्वान् यः कल्याणमित्रमित्यात्मानमाचष्टे। स एकदा भरतभुवमाजगाम बहूनि स्थानानि च गमिकर्मीचकार। गमिकर्मीकृत्य च तानि स्वदेशं स प्रतिनिववृते। प्रतिनिवृत्तेन च तेन भारतभूमियात्रावृत्तान्तः स्वकीयः संस्कृतपद्यैरुपनिबद्धः। तेषु कानिचनात्रोद्ध्रियन्ते–

सर्वत्र भारते खण्डे कृतज्ञात्मा स्मराम्यहम्।
बहून् देशान् दृष्टवन्तः चारुप्रकृतिविस्मिताः।।

दृष्टपूर्वा न चास्माभिः कदाचन तथाविधाः।
कल्कत्तानगरीं गत्वा विमानेन विहायसा।
दृष्ट्वा तांस्तांश्च विषयान् पाटलीपुत्रमागताः।।

इतो गता वयं शीघ्रं बङ्गलोरपुरं प्रति।
यत्र प्रियः शीतवातो नित्यं वहति दक्षिणः।।

ततो मद्रासनगरं यत्र स्नाता महार्णवे।
महानटीं सुलोचनां श्रीमदायतलोचनाम्।
सस्नेहमभिनन्दामि तेजसास्याश्च मोहितः।।

बहुराष्ट्राण्यतिक्रम्य विमानेन विहायसा।
पुराणीं सुन्दरीं भूमिं भवतां वयमागताः।।

युष्मान् वयं सूचयामः स्निग्धानस्मत्सुहृज्जनान्।।
अस्मद्भूम्याः पूर्वकालादासीन्मैत्र्यं सनातनम्।
एतद्विवर्धनार्थं च वयं सर्वे यतामहे।।

अविभेद्यमिदं मैत्र्यं प्रजानामावयोर्महत्।
सर्वत्र जनताभूत्यै जीवतात् शाश्वतीः समाः।।

शर्मण्यदेशीयट्यूबिंगनविश्वविद्यालये निबन्धस्यैतस्य निबन्द्धा वर्षमेकमभ्यागताचार्यरूपेणाध्यापितम्। वर्षान्ते तत्प्रस्थानकाले तत्रत्यविद्वन्मूर्धन्येन श्रीशतीतनक्रन् महाभागेन रचितानि चत्वारि पद्यानि वाचितानि च तेन प्रस्थानकाले समायोजिते सौप्रस्थानिकोत्सवे। रमणीयां तत्पद्यच्छटां विभावयन्तु सुधियः–

(१०) (९) *भारतराजधान्यां यो व्याकरणविदां वरः।*
पारगः सर्वविद्यानां कवीनां मुकुटे स्थितः।।

शशास सत्यमावृत्य शास्त्री शास्त्रविशारदः।
शिष्याञ्शिक्षाशुश्रूषार्थाञ्शर्मण्यदेशमागतः।।

वर्षान्ते तु सपत्नीकस्त्यूबिंगन्नगराच्छुभात्।
स्वदेशं गन्तुकामोऽद्य पुनः प्रयातुमुद्यतः।।

स्मृतिः सुरमणीया स्यात्स्वकर्मसु सुहृत्सु च।
दूरे वसन्नदूरेऽस्तु हृदि मैत्रीं प्रवर्तयन्।।

कालान्तरे पत्रमाध्यमेनैकार्याऽपि तेन प्रेषिता–

जीवन्ति मे हृदये ये
तव मित्र! प्रीत्या चित्तरागाः।
ते त्वां सुप्रह्लादयितुं
शीघ्रं त्वन्मनोऽधिगच्छेयुः।।

यदा कदा पत्राण्यपि वैदिशिका विद्वांसः संस्कृतेन प्रेषयन्ति। निबन्धस्यास्य निबन्द्ध्रा प्राप्तेषु कतिपयेषु तादृशेषु पत्रेष्वेकं सविशेषमुल्लेखमर्हति। शर्मण्यदेशीयट्यू-बिंगनविश्वविद्यालये भारतीयविद्यासंस्थाने पूर्वोल्लिखितानां श्तीतन्क्रनमहाभागानां शिष्यः सहयोगी च पायर इति नामा विद्वान्। सः 1983 ईसवीये संवत्सरे सपत्नीको भारतभ्रमणार्थमागतः। तदा निबन्धस्यास्य निबन्द्धा पुरीम् अधिवसति स्म। सप्ताहं स तस्मिन् स्थितः। श्रीजगन्नाथसंस्कृतविश्वविद्यालये तस्य भाषणमप्यभूत्। ततः स दक्षिणस्यां दिशि नानास्थानानि गमिकर्मीकृत्य पुनः पुरीं प्रत्यावृत्य दिनत्रयं च तामध्युष्य शान्तिनिकेतनं प्रस्थितः। ततश्च कलिकातानगरं ततश्च स्वदेशम्। स्वदेशप्रत्यावर्तनानन्तरं पुरीतः प्रस्थानान्तरं कुत्र कुत्र गतं तेन, किं किं वा दृष्टमिति चिरेण प्रेषिते स्वपत्रे विन्यस्तम्। तदेव पत्रमत्राविकलमुद्ध्रियते–

स्वस्ति।

महाकवयः सत्यव्रतपण्डिताः! सस्नेहमभिवादनानि

अतिदीर्घकालं तत्रभवद्भ्यः पत्रं न प्रैषयम्। तत्रभवन्तो मम दुश्चरितं मर्षयन्त्विति मम प्रार्थना। तत्रभवतां पत्रमतोषयदेवावाम्।

पुर्या अपक्रम्य सुखसुप्तौ शान्तिनिकेतनमागच्छाव। तत्र प्रोफेसर बनर्जी महाभागा रेल्यानस्थानमागम्यावां विश्वविद्यालयस्यातिथिभवनं नीत्वा विश्वविद्यालयं रवीन्द्रनाथ-ठाकुरमहाभागानां निवेशनान्यदर्शयन्। आवां शान्तिनिकेतने तिष्ठन्तावतुष्याव। शान्तिनिकेतनेऽहोरात्रं स्थित्वा काल्कटमहानगरं प्रातिष्ठावहि। रेल्यानविलम्बेन काल्कटमहानगरं मध्यनिशायामेव प्रापद्यावहि। तत्र प्रोफेसरमूखर्जीमहाभागानामगारे व्यश्राम्याव। शनिवासरे प्रोफेसरमूखर्जीमहाभागा नौ भरतीयकौतुकागारे प्राचीना मूर्तीश्चित्राणि [illegible] तिष्ठती तुतुषिव। रविवारे आवाभ्यां ट्युबिङ्गननगरं

प्रति गन्तव्यमासीत्। यात्रा सुखं निष्पन्ना। ट्युबिङ्गननगरे प्रोफेसर स्तीतनक्रन्-महाभागानपश्यम्। द्विदिनानन्तरं प्रोफसर स्तीतनन्क्रन्महाभागा अमेरिकादेशं प्रति प्रतस्थुः[4]। तत्रभवतां सपत्नीकानां कुशलवृत्तमस्त्विपि सर्वेषामाशा। ओफ्तरदिङ्गनग्रामं प्रत्यागत्य सप्ताहं रोगपीडित आसम्। इदानीं मया बहूनि कृत्यानि कर्तव्यानि। मार्गरितामहाभागयाऽद्यप्रभृति सप्ताहं पञ्चषष्ट्याश्च्छात्राणां छात्रीणां च परीक्षा कर्तव्या। पूर्वमेव त्रिंशदधिकं शतं पत्राणि सा पर्यैक्षत।

आवां तत्रभवतां तत्रभवत्पत्न्याश्च स्मरावो बहुधा। बल्जियमविश्वविद्यालयगतान् तत्रभवतो द्रक्ष्याव इत्याशास्वहे। तत्रभवतां सपत्नीकानां सर्वं कुशलमेवास्त्वित्यर्थयावहे।

तत्रभवतां पुत्रौ,
आलोविस्मार्गरिते।

पुर्याः सर्वान् परिचितानत्रभवद्भिरभिवादयावः।

वैदेशिकेषु विद्वत्स्वस्ति तादृशोऽप्येको येन स्वकीयः शोधप्रबन्धोऽपि संस्कृतेन विरचितः। सोऽस्ति थाईदेशीयः चमलौङ् सरबद्नुकाख्यः। बैंकाकनगरे शिल्पाकर-विश्वविद्यालये सः संस्कृताध्यापकः। वर्षद्वयं यावदनेन सङ्कायाध्यक्षपदमप्यूढम्। सुरभारत्यां तस्याप्रतिहता गतिः। 1983 ईसवीये संवत्सरे तेन वाराणसेयसम्पूर्णानन्द-संस्कृतविश्वविद्यालयतो वेदविभागाध्यक्षाणां डाक्टर युगलकिशोरमिश्रमहाभागानां निर्देशने विद्यावारिधिरित्युपाधिरधिगतः। नाना ग्रन्थाः संस्कृतविषयकास्तेन स्वमातृभाषया विरचितास्तया वाऽनूदिताः। केवलं निदर्शनार्थम् अत्र शोधप्रबन्धस्य पुरोवाचः केचनांशा उद्ध्रियन्ते—

चांलोङ्सरबद्नूक् नामाहं थाईदेशे लब्धजनिः बाल्यकालादेव भगवतस्तथागतस्य कृपया संस्कृताध्ययने प्राप्तरुचिरासम्। महाचूडालंकरणबौद्ध (बैंकाक) विश्वविद्यालयतः बौद्धदर्शनविषयमधिकृत्य मया स्नातकपरीक्षा समुत्तीर्णा। संस्कृतसाहित्यविषयिणीं स्वीयां ज्ञानपिपासां पूरयितुं भगवता श्रीबुद्धेन कृतवसतिकेऽस्मिन् काशीनगरे विद्याधिगमनार्थमिच्छामकुर्वम्। ... ततः भारतदेशस्य विद्याराजधान्यां काश्यां समागत्य मया काशी हिन्दुविश्वविद्यालयीये संस्कृतपालिविभागे स्नातकोत्तरकक्षायां संस्कृतविषयमधिकृत्याध्ययनं कृतम्। तत्राध्ययनसमये वैदिकसाहित्यविषये पूर्वजन्मकृतपुण्योदयेन गुरुवर्याणां डा. वीरेन्द्रकुमारवर्ममहोदयानां सन्निधाने वेदाध्ययनेन च काचन विशिष्टा अभिरुचिर्मनसि समुत्पन्नेति वेदवर्गं स्वीकृत्य एम्. ए. संस्कृतपरीक्षायां साफल्यमभजम्। तदनन्तरं संस्कृतसाहित्यावगाहने सविशेषमानन्दमनुभवता मया सम्पूर्णानन्दसंस्कृतविश्वविद्यालयतः 'विद्यावारिधि'इत्युपाधिप्राप्त्यर्थं मनसि योजितम्।

थाईदेशे विश्वविद्यालयेषु संस्कृतस्य अध्ययनं अध्यापनं प्रचलति। किन्तु प्रायशश्छात्रैर्लौकिकसंस्कृतमेव तत्राधीयते। विच्छिन्नसम्प्रदायत्वाद्वा प्रयोगविरहेण वा वैदिकभाषाशिक्षणं तत्र स्वल्पमेव भवति। यद्यपि थाईदेशे वैदिकभाषायाः लौकिकसंस्कृतस्य च महत्त्वं समानमस्ति तथापि वैदिकभाषाशिक्षकाणां न्यूनत्वादल्पेषु

शिक्षणस्थानेष्वेव वैदिकभाषा अध्याप्यते। परं प्रमोदास्पदमिदं यदधुना थाईजना: भारतवर्षे समागत्य विश्वविद्यालयेषु वैदिकं वाङ्मयं भाषां च पठन्ति। अहमपि तेष्वेव अन्यतम:। एवं हि शीघ्रमेव थाईदेशे वैदिकशिक्षका बहवो भविष्यन्ति तथा च तत्र वैदिकज्ञानराशे: भाषायाश्च शिक्षणप्रसार: रुचिरं भविष्यतीति वक्तुं सुवचम्।

अन्ते च इदं निवेदयन्नुपसंहरामि–

दूरादुपेक्षां निर्धूय कृपां कृत्वा ममोपरि।
विलोक्यो मत्प्रबन्धोऽयं बुद्धिमद्भिर्द्विजोत्तमैः।।

सन्त्यनेके तादृशा विद्वांसो वैदेशिका: श्रीपालथीमे-हंस हाइन्‌रिश् हाक् प्रभृतयो ये धाराप्रवाहरूपेण संस्कृतेन वक्तुं प्रभवन्ति परं संस्कृतेन तैर्न लिखितं बहु। यदि तेऽलेखिष्यंस्तर्हि भूयसीं संस्कृतवाङ्मयस्य श्रीवृद्धिमकरिष्यन्।

वैदेशिकैर्मनीषिभिर्यावन्मात्रं संस्कृतेनोपनिबद्धं तेनापीदमनुमातुं शक्यते यत् तेष्वस्ति शक्ति: संस्कृतलेखने। केवलममन्दोऽभियोगोऽभ्यासश्चापेक्ष्येते। एतदर्थं ते यद्युञ्जीरंस्तर्ह्यवश्यमेव स्वकीयपाण्डित्यं ते संस्कृतभाषयाऽऽविष्कृत्य कामप्यपूर्वां संस्कृवाङ्मयस्य श्रीवृद्धिं विदधीरन्। यदपि यावदपि वा तै: संस्कृतेन निबद्धं तदप्यस्माकं भारतीयानां कृते परमं मोदावहं चित्रीयाकरञ्च। संस्कृतं नास्ति येषां भाषा तेष्वपि कैश्चन यदि संस्कृतेन व्यवहर्तुं प्रयत्यते तर्हि जितं नाम संस्कृतेन।।

सन्दर्भ सूची

1. चिन्त्योऽयं प्रयोग:। आशिष्ट्यै इत्येव साधु स्यात्।
2. वदि: परस्मैपदी। वदीत्येव साधु।
3. अनद्यतनपरोक्षे लिटो विधानाल्लिट्प्रयोगोऽत्रानुचित:।
4. प्रतस्थिरे इत्येव साधु।

दती

VIII

वैदेशिकविदुषां संस्कृतरचनाः

विदेशेषु सन्ति नैके संस्कृतविद्वांसः। तत्र संस्कृताध्ययनपरम्पराऽतिपुरातनी। संस्कृतवाङ्मयं तत्रत्या विपश्चिदपश्चिमाः सम्यक् परिशीलयन्ति, गूढं च तद्रहस्यमुद्भिन्दन्ति, सूक्ष्मेक्षिकां च स्वकीयाममन्दमभियोगं च स्वकमभिव्यञ्जन्ति। एवं सत्यपि विरला एव तत्रत्याः संस्कृतेन वक्तुं प्रभवन्ति तल्लेखने वा। न तेन तेषां संस्कृतपाण्डित्यं पल्लवग्राहीति कदाचिदपि शङ्कनीयम्। संस्कृव्यवहारपरम्पराया अभाव एव तत्र हेतुः। न हि संस्कृतं तदीया भाषा। संस्कृतव्यवहारस्यावसरोऽपि तत्र नास्ति। तेन यदि तत्रत्याः संस्कृव्यवहारेऽक्षमास्तर्हि न तत्र किमपि चित्रम्। इदमेव तावच्चित्रं यदेवं स्थितेऽपि, तत्र संस्कृतव्यवहारपरम्पराऽभावेऽपि, सन्ति केचन तादृशा विद्वांसो ये संस्कृतेन पद्यानि रचयन्ति, निबन्धान् निबध्नन्ति, पत्रादिकमपि सुहृज्जनेभ्यः संस्कृतेनैव प्रेषयन्ति। असाधरणस्तेषामस्यां वाचि समधिकारः। प्रसन्नमधुरश्च तेषां वागुम्फः। निदर्शनार्थं तेषु कतिपयेषां मधुकर्या वृत्त्या सञ्चिताः संस्कृतकृतीरत्र भारतीयानां संस्कृतविदुषां मनोविनोदार्थं प्रस्तुमः।

आसीच्छर्मण्यदेशे वल्द्शिमद्त् नामा सुप्रथितो विद्वान्। सीगित्याख्य आसीत्तस्य गुरुर्यतोऽनेन संस्कृतमधीतम्। गुरोरशीतिवर्षपूर्तिमभिलक्ष्य विदुषाऽनेन स्वकीयाः शुभाशंसाः मन्दाक्रान्ताछन्दसोपनिबद्धैः संस्कृतपद्यैः प्रेषिताः। शर्मण्यदेशीयगातिंगन्विश्वविद्यालयतः समुपलब्धा तत्पाण्डुलिपिः। मेघदूतपद्यानुकारीणि तानि पद्यानि कं सरसहृदयं सहृदयं नानुरञ्जयेयुः—

(1) *पृच्छामि त्वां कुसुमरचने गन्धसौरभ्यमाले*
दौत्यं हर्तुं स्मरणघटितं धन्यवादं भरन्मे।

गन्तव्यस्ते नगरविदितो धीमतामुत्तमाङ्ग
आग्नेयोक्तेर्विवरणकरो गस्तकौचेयभासः।

जातो वंशे विजयवचनात्प्राप्तकल्याणनाम्नि
विद्वान् यो मे गुरुरपि सखा विद्धि सोऽशीतवर्षः।

आचार्यस्य प्रविश भवनं तस्य पत्नीप्रशिष्टं
गाढग्रन्थं वद सुमधुरं प्राज्ञ विज्ञं पठन्तम्।।
जिज्ञासूनां त्वमसि शरणं बुद्धिधारापयोद-
स्तर्कोपेतश्चतुरमनसा चारु निर्मुक्तशङ्कः।
आकाङ्क्षामो हृदि तव हितं तेन चोच्चैर्ह्वयामो
जीवेच्छ्रीमान् जयतु जयवान् वर्षनानाशतानि।।

पोलैण्डदेश आसीद् ऐण्ड्रूस् गवरोंस्कीतिनामधेयः सुप्रथितो विद्वान्। वार्सानगरे चिराय स वार्साविश्वविद्यालयीयप्राच्यविद्यासंस्थानस्याध्यक्षपदमध्यतिष्ठत्। तस्य सुरगवीपाटवमद्यापि पोलैण्डदेशीयाः सोत्साहं कीर्तयन्ति। एवं हि श्रूयते यद्यदा स छात्र एवासीत्तदा कस्यामपि विद्वत्सभायां समुपस्थातुं फ्रांसदेशराजधानीं पेरीसपुरीमुपेतः। तत्र चाल्पवयस्क इति सभागारे कस्मिंश्चित्कोणे समुपविष्टः। प्रारब्धे सभाकार्ये विद्वत्सु भाषमाणेषु कयाचिदन्तःप्रेरणया स संस्कृतेन पद्यमेकमरचयत्। तच्च पद्यं पत्रखण्डमारोप्य स्वसमीप उपविष्टं कमपि स्वपरिचितमपाठयत्। स च पत्रखण्ड-स्तेनान्यस्मै प्रदत्तस्तेन च ततोऽन्यस्मै। एवं हस्ताद्धस्तं गच्छन्स पत्रखण्डः क्रमेण सभाध्यक्षं प्राप्तः। तेन तत्स्थं पद्यं तथा रमणीयमनुभूतं यत्सभामञ्चत एव वाचितं यच्छ्रुत्वा सर्वेऽपि सुतरां चमत्कृताः। तदनन्तरं सभाध्यक्षेण सभाकार्यसञ्चालनार्थं किशोरकः श्रीगवरोंस्कीमहाभागो निमन्त्रितस्तेन च तत्कार्यं महता कौशलेन निर्व्यूढम्। विलक्षणं तत्पद्यं न सम्प्रति कुत्राप्युपलभ्यते। पोलैण्डदेशीयास्तच्चर्चयन्ति परं न तत्सम्प्रति कस्मिन्नप्यस्ति। श्रीगवरोंस्किमहाभागस्य ग्रन्थादिषु निपुणं निरीक्ष्यमाणेषु तत्कदाचिद् दृष्टिपथमापतेत्। भूयान् कालो व्यतीतस्तस्य रचितस्य। कुत्र तत्स्थापितं तेन विदुषेति न कोऽपि सम्प्रति जानाति। तस्यैव विद्वद्गोष्ठीगरिष्ठस्य स्वनामधन्यस्य शिष्य आसीत् सुश्केविच्महाभागो यस्तदनन्तरं प्राच्यविद्यासंस्थानस्य वार्साविश्व-विद्यालयीयस्य तदुत्तराधिकारिरूपेणाध्यक्षपदमप्यलमकरोत्। परश्शतानां निबन्धानां प्रणेता स गुरुकृपया सुरगवीगद्यपद्यबन्धेऽप्यनितरसाधारणीं कामपि नैपुणीमध्यगमत्।

पोलैण्डदेशे, न केवलं पोलैण्डदेश एव, अपि त्वनेकेषु योरूपीयदेशेषु एषा पद्धतिर्यत्तत्रत्या जनाः कस्यापि दिव्यपुरुषस्य जोनस्य वा पौलस्य वाऽथवाऽन्यस्य कस्याप्येवंविधस्य जन्मदिवसमात्मीयं जन्मदिवसमिति स्वीकुर्वन्ति। तच्च नामदिनमिति व्यवहरन्ति। नामदिनं नाम तेषां कृते महानुत्सवः। तादृशमेव किमपि नामदिनमुपलक्ष्य स्वगुरुं श्रीगवरोंस्किमहाभागं प्रति प्रेरिताः शुभाशंसा गद्यपद्यरूपेण सुरगवीरुचिरपदबन्धेन श्रीसुश्केविच्महाभागेन। प्रथमं पद्यान्यत्र तदनन्तरं च गद्यम्। तदुभयमिदं तेन स्वपरवर्तिने प्राच्यसंस्थानाध्यक्षाय श्रीक्रिस्तोफरबिस्कींमहाभागाय 'निबन्द्धृसकाशात्कृतज्ञता-पूर्वकमुपहारीक्रियत' इति पङ्क्तिपूर्वकं प्रदत्तम्। सम्प्रति तत् तस्मिन्नेवास्ति। तत एव च तदुपलभ्य विदुषां मनोविनोदायात्रोपस्थाप्यते। पद्यभागापेक्षया गद्यभागोऽत्रोत्कृष्टतरः।

महाकवेः बाणस्य शैलीमनुकुर्वन् स भारतीयान् संस्कृतविदुषः पाश्चात्त्यसंस्कृतविदुषां संस्कृतगद्यलेखने कामपि विलक्षणां नैपुणीं परिचाययेत्प्रौढिं चाप्यपूर्वाम्। पद्यरसं प्रथममास्वाद्य गद्यरसमास्वादयन्तु सुधियः—

पद्यभागः

अस्त्वन्येषां बहुलगहनाकीर्णमित्युग्रदुर्गं
क्रान्त्वा क्रान्त्वा स्खलितचरणं कण्टकैर्दीर्णवासः।

अन्ते मोक्षो न इति निहतानिष्टनिर्वेदमेव
आयुःसंज्ञं गमनमचिरान्मृष्टपादाङ्कपङ्क्ति।।

नष्टं नामापि ननु सुतरां का कथा कर्मणामि-
त्युद्दिश्यान्यान् अवमतिपरं कथ्यतां वृत्तविद्भिः।

जीवं तेषां श्रमभरयुतं यातयामं किलैव
वाक्कर्माद्यं लिपिरिव गतं जातु लोकार्णवेऽस्मिन्।।

युष्मन्नाम्ना दशशतकराच्चण्डमुद्द्योतिते तु
सूर्यभ्रान्त्या सकलमपि विद्यत्कुलं (अत्र यतिभङ्गः) तूर्णमेव।

रश्मींस्तारान् क्षयिततिमिरान् सर्वतो विप्रसार्य
विद्यालोकेऽहमहिमकयेवार्ककान्तत्वमैतु।।

भूयोभिः किं कुशलयशसी चक्रवाकामिधे द्वे
स्यातां रात्रावपि नु वियुते संनिधाने सदा ते।

इत्याद्यद्य स्मृतशुभशता निर्गता मद्धृदो वाग्
आशिष्टायै बहुमतगुरोः कल्प्यतामल्पतायाम्।।

सूर्यादौष्ण्यं वारिराशेश्च शौच्यं
वाताच्छैत्यं वालुकाभ्यो बहुत्वम्।

इत्यादाय त्वत्सकाशं गुरो हे!
गच्छन्त्वद्य प्राग् यथा मन्मनांसि।।

गद्यभागः

"अद्य खल्वष्टाङ्गपातत्वेन गुरून् प्रणमामः। द्वे एव वर्षे अस्माकं गुरुभिरध्याप्य-मानानां पर्यायं गते। किन्तु संवत्सरयुगमात्रमूढं दुष्करं यदि सत्यमित्युद्भिन्नकम्पाः संस्कृतविषयालवाल उपदेशप्रभृत्यध्यापनोत्सेकादिव्यापारशतपोषिताः शिष्यपाद-पास्तिष्ठामः। गुरुज्ञानसूर्यप्रभववाग्विशेषरश्मिपुञ्जबलेन च लवमात्रशेषीकृतसूचि-

भेद्यान्धकारा वर्तामहे। अथवा जातभेदावस्थान्तरत्वेन शुभोक्त्यादिमधुलालसाः पाठकमिलिन्दभूताः संस्कृतपुस्तकोद्यानेषु गुरुपादादिष्टमार्गा यथासुखं पुष्पात्पुष्पं पतामः। एतत्प्रतीन्धनजनितहर्षशिखाप्राग्भारत्वे बृहद्भानुकल्पीभूता अपि न तावद् आश्रयाशं यथार्थनामानं विदध्मः। अथ गुरुनामोत्सवदिने भक्तिबहुमानादिपरिवारा साक्षादिव वपुष्मती कृतज्ञता शरदां शतं जीवत सर्वाण्यपि रोगाध्यादिरूपाणि दुःखानि दीर्घायुस्तेजः प्रभावोत्पादितोत्कटभयकान्दिशीकीकृतान्यतिमात्रबाधितविरोधिमनांसि दूरतो वर्तन्ताम् इत्यादिभिः स्वान्तारामप्रभवैराशीर्वादसुमनोभिरवतंसवेष्टितोत्तमाङ्गान् गुरून् कुर्मः।"

अस्मिन्भूमण्डले आक्सफोर्डविश्वविद्यालयस्य महती ख्यातिः। नाना वर्षाणि तत्र संस्कृत-पण्डितपरम्परायाः संस्कृतमनुशीलन्त्याः। तत्र भारतीयसंस्थानमिति नाम्नाऽस्ति भवनं यन्निर्माणार्थं धनं प्रायशो भारतीयैरेव सञ्चितम्। 1886 तमे ईशवीये संवत्सरे तस्योद्घाटनं ब्रिटेनयुवराजेन 'प्रिंस आफ वेल्स' इति विरुदभाजा कृतम्। तदवसरे द्वे पद्ये द्वारदेशे विन्यस्ते शिलापट्टक उत्कीर्णे ययोर्द्वितीये भारताङ्गलदेशयोर्मिथो मैत्रीविवर्धनं प्रार्थितम्—

ईशानुकम्पया नित्यमार्यविद्या महीयताम्।
आर्यावर्ताङ्ग्लभूम्योश्च मिथो मैत्री विवर्धताम्।।

कालान्तरे भारतीयविद्याध्ययनार्थमेव स्थापितादस्माद्भवनात् संस्कृतविभाग उत्सारणीयस्तत्स्थाने च प्रबन्धविभागः स्थापनीय इति आक्सफोर्डविश्वविद्यालयाधिकृतैर्निर्णीतम्। तज्ज्ञात्वा दुःखभराक्रान्तेन चेतसा तदनीन्तनेन संस्कृतप्राध्यापकेन सुप्रथितयशसा श्रीमता टी. बरौ महाभागेन पद्यानि कानिचन व्यरचिषत येषु स्वकीया मानसी व्यथा तैरित्थमाविष्कृता—

ततः षष्टितमे वर्षे दुर्नयग्रस्तबुद्धिभिः।
विद्यालयमहामात्रैरार्यधर्मपराङ्मुखैः।।

सरस्वतीं लघूकृत्य पाण्डित्यमवमान्य च।
तयोर्भूम्योस्तिरस्कृत्य मैत्रीमनर्थिकामिव।।

कायस्थराक्षसानां च परस्वादानगृद्धिनाम्।
गणकानां च हस्तेषु प्रापिता स्वार्थसिद्धये।।

विद्याविहीना शालैषा परैर्नीता पराभवम्।
अयोध्या प्रोषिते रामे नष्टश्रीरिव शोचति।।

शर्मण्यदेशे कोवेल्नामा बभूव पण्डितप्रवेकः। स्वोपज्ञानि नानापद्यानि तेन रचितानि भाषान्तरेभ्यश्च संस्कृतेनाऽनूदितानि। तेषु कतिपयान्येव विद्वन्मनोरञ्जनायात्रोपस्थाप्यन्ते। यदा विद्वन्मूर्धन्यो मोक्षमूलरभट्टः पञ्चाशद्वर्षोऽभूत् तदा तं अभिनन्दता कोवल्पण्डितेन पद्यमिदं तं प्रति प्रेषितम्—

Stefano Piano

(3) Best greetings to You and Your Family for a happy new year!

Thank You very much for your नववर्षशुभाशंसा and Your beautiful sanskrit verse!

Are You still collecting sanskrit "poetry" from foreign countries? Longtime ago I tried to

Front

Back Side

S/c

Stefano Piano

Best greetings to You and Your Family for a happy new year!

Thank You very much for your नववर्षशुभाशंसा and Your beautiful sanskrit verse!

Are You still collecting sanskrit "poetry" from foreign countries? Longtime ago I tried to

3 3 3a

Stefano Piano

Best greetings to You and Your Family
for a happy new year!
Thank You very much for your नववर्षशुभाशंसा
and your beautiful sanskrit verse!
Are You still collecting sanskrit "poetry" from
foreign countries? Longtime ago I tried to

compose a śloka on the theme of love - I found it out of old papers - It is as follows, and let Vālmīki and other great Kavi-s forgive me :

सुरूपा हि त्वमेवासि व्याघ्र इव तु निर्दया ।
मामेकाकिनमेवेह रतापि किं न खादसि ॥

I hope it will not badly pierce your refined ear!
Best wishes again to the whole family from

Stefano & Family

3 (b)

(3) (a)

Stefano Piano

Best greetings to You and Your Family for a happy new year!

Thank You very much for your नववर्षशुभाशंसा and Your beautiful sanskrit verse!

Are You still collecting sanskrit "poetry" from foreign countries? Longtime ago I tried to

(4)

UNIV... ...BURG
...für Kultur und Geschichte Indiens

HAMBURG 13, den 4-2-54.
Bornplatz 2
Fernsprecher 44 10 71

Klaus Bruhn

to: Satyavrata Sastri
Panjab University
Oriental College
Jullundur City

मान्याः विद्वद्वराः

क्षमिष्यन्ते कालविलम्बमाचार्यवर्या इति आशया अनेन जनेन अतीतसंवत्सरीकस्य लेखस्य
अनन्यभाषाद्वारा उत्तरदाने मनो दीयते । श्रीमत्पत्रपठनान्तरं दिष्ट्या लब्धोऽयं भारतवासिना समं
संस्तवस्थापनावसर इति हृदये उत्पन्नो ऽनल्पो हर्षोदयः । तथापि आनन्साद्भापार-
भारस्य दुष्करत्वात्संस्कृतपत्रस्य मन्दत्वाद्द्विजबुद्धेर्न तत्क्षणमेव प्रत्युत्तरीकृतम् ।
.तु अद्य परिज्ञानन्तरम् (डॉ) यत्नेन लेखनारम्भः क्रियते ।

पालि सप्त वर्षा मे संस्कृतप्राकृतयोरध्ययने व्यापृतस्य प्रणीतश्च शीलाङ्क-विरचित-
.प्पसमाहापरिसचारियारव्यकृति-विषयको ग्रन्थलेशः । भविष्यत्काले जैनागमसंबद्ध-
सा..त्तीराधिकृत्य यातिष्ये । अद्य आचिरादेवं भारतागमनानुष्ठानं कुर्यामिति मे
चउप.. ..ष्यम् ।
टीकादि वृत्ता.

..न्तीह हंबुर्ग-विश्वविद्यालये प्रतिवर्षं केचिद्भारतविद्यार्थिनः संस्कृतभाषया हिन्दी-
भाषया वा अभ्यासनिरता, कतिपये प्राकृतभाषाधिगममपि ~~करोति~~ कुर्वन्ति । अधीयन्ते
.येन वेदाः, काव्या, जैन०, बौद्धसूत्राणि । कदाचित्तथैव अपभ्रंशनिबन्धाः पठ्यन्ते । डॉ अल्सदोर्फ
वर्तमाने काले इह भारतविद्याशालाया अधिष्ठाता) बहूनि वर्षाणि अपभ्रंशानुसन्धानक्रियायां
व्यापृतवान् । डॉ तावद्य (गुर्जरदेशोत्पन्नः) हिन्दीभाषाध्यापने वर्तते ।
किंचिदन्यदपि कथयिष्यते । संप्रति भवतां
विस्तरेण । यद्दिष्टं विद्वद्वरैरपरपत्रे
.द्यलेखपठनक्लेशेन क्लान्तिरुत्पादिता स्यादिति आशङ्कया विरम्यते ।

युष्मद्धितैषी

Klaus Bruhn

UNIVERSITÄT HAMBURG
Seminar für Kultur und Geschichte Indiens

HAMBURG 13, den 4-2-54
Bornplatz 2
Fernsprecher 44 10 71

Klaus Bruhn

to: Satyavrata Śāstrī
Panjab University
Oriental College
Jullundur City

मान्याः विद्वद्वराः

क्षमिष्यन्ते कालविलम्बमाचार्यवर्या इति आशया अनेन जनेन अतीतसंवत्सरीकस्य लेखस्य
अनन्यभाषाद्वारा उत्तरदाने मनो दीयते। श्रीमत्पत्रपठनानन्तरं दिष्ट्या लब्धोऽयं भारतवासिना समं
संलापस्थापनावसर इति हृदये उत्पन्नोऽनल्पो हर्षोदयः। तथापि आनन्दसाम्राज्यपार-
भारस्य दुष्करत्वात्संस्कृतपत्रस्य मन्दत्वान्निजबुद्धेर्न तत्क्षणमेव प्रत्युत्तरीकृतम्।
किंतु अद्य परीक्षानन्तरम् (डॉ) यत्नेन लेखनारम्भः क्रियते।

सन्ति सप्त वर्षा मे संस्कृतप्राकृतयोरध्ययने व्यापृतस्य प्रणीतश्च शीलाङ्क-विरचित-
चउप्पन्नमहापुरिसचरियाख्यकृति-विषयको ग्रन्थलेशः। भविष्यत्काले जैनागमसंबद्ध-
टीकादिवृत्तीरधिकृत्य यतिष्ये। अद्य अचिरादेव भारतागमनानुष्ठानं कुर्यामिति मे
प्रसन्नौत्सुक्यम्।

सन्तीह हंबुर्ग-विश्वविद्यालये प्रतिवर्षं केचिद्भारतविद्यार्थिनः संस्कृतभाषया हिन्दी-
भाषया वा अभ्यासनिरता, कतिपये प्राकृतभाषाधिगममपि ~~करोति~~ कुर्वन्ति। अधीयन्ते
प्रायेण वेदाः, काव्या, जैन०, बौद्धसूत्राणि। कदाचित्तथैव अपभ्रंशनिबन्धाः पठ्यन्ते। डॉ अल्सदोर्फ
(वर्तमाने काले इह भारतविद्याशालाया अधिष्ठाता) बहूनि वर्षाणि अपभ्रंशानुसन्धानक्रियायां
व्यापृतवान्। डॉ तावद्य (गुर्जरदेशोत्पन्नः) हिन्दीभाषाध्यापने वर्तते। संप्रति भवतां
अलं विस्तरेण। यदीदं विद्वद्वरैरपरपत्रे किंचिदन्यदपि कथयिष्यते।
सावधं लेखपठनक्लेशेन क्लान्तिरुत्पादिता स्यादिति आशङ्कया विरम्यते।

युष्मद्धितैषी

Klaus Bruhn

मान्यगुरुवर्य !

- टामस ओबर्लिस, फ्राइबुर्ग, जर्मनी

ज्ञानपीठप्रदीपेन दीपितं भुवनं त्वया ।
गुरो ! साम्प्रतमास्से त्वं पद्मभूषणभूषित: ।।१ ।।

पद्मेन भूषितोऽसि त्वं पद्मं वा भूषितं त्वया ।
इति मे नास्ति सन्देह: पद्मं त्वं समभूषय: ।।२ ।।

स्मृतिपथे दिवसा मम यान्ति ते
सुखकरा गमितास्तव येऽन्तिके ।
त्वमसि शास्त्रचणो निपुणेक्षण:
सकलशिष्यगणप्रियतां गत: ।।३ ।।

विविधशास्त्रचयं समबोधयो-
ऽनतिबुधं निजशिष्यचयं मुदा ।
अपि दुरूहतमं विशदं गुरो !
श्रमगतो विषयं त्वमचीकर: ।।४ ।।

स्मितमुखालपनेन सदा जनान्
परिचयं न गतानपि मोहयन् ।
प्रकटयन् निजसात्त्विकवृत्तितां
त्वमभवो भुवि सत्त्वभृतां वर: ।।५ ।।

स्मरामस्ते गुणान्नित्यं तव शिष्या वयं समे ।
चर्चयामो मुदा तांश्च परस्परमुपागता: ।।६ ।।

तव शिष्या इति वयं धन्यतां कलयामहे ।
भाग्यादेव हि लभ्यन्ते त्वादृशा गुरवो भुवि ।।७ ।।

भारते भारतोऽसि त्वं वयं शर्मण्यवासिन: ।
तव शर्म सदा देवं प्रभुं सम्प्रार्थयामहे ।।८ ।।

सदा स्वस्थस्सदा तुष्टस्सदा पुष्टश्च कोविद ! ।
सुखेन सकुटुम्बस्त्वं शतं जीव समा गुरो ! ।।९ ।।

इतोऽपि भूयसो लब्ध्वा सम्मानाँल्लोकहर्षदान् ।
यशो वितन्वँल्लोकेषु जीवितं व्यतियापय ।।१० ।।

इति प्रणामाञ्जलिस्तव शिष्यस्य टामस ओबर्लिस् इत्यस्य ।

कोऽहम् ?

— सत्यव्रत शास्त्री

प्रश्नोऽयं समुदेति मे मनसि भोः कोऽहं कुतस्त्यस्तथा
किं वा नाम करोम्यहं जगति किं कुत्रास्म्यहं संस्थितः ।
किं लक्ष्यं किमु वा महत्त्वमथवा किं वा ममाऽऽस्ते पदम्
आत्मा मे सुतरामसंस्तुत इति प्राप्तोऽस्मि चित्रां दशाम् ।।1।।

यद्यच्चिन्तनमस्ति मे मनसि किं वाचा भवेत् तत् स्फुटं
किं वा कर्मणि तद् भवेत्परिणतं किं वा परेभ्यो भवेत् ।
तत्सम्यक् प्रतिपादितं किमथवा ज्ञातं मया स्यान्नवे-
त्येवं विप्रतिपन्नमानसतया नो शान्तिमाप्नोम्यहम् ।।2।।

किं मे धावनमस्तु वा सुविरतिः कार्यान्तरेभ्यो भवेत्
किं वा तेष्वभिरक्तिरस्तु किमु वा तेभ्यो विरक्तिर्भवेत् ।
चिन्ताचान्तमना इति प्रविततं सर्वं चरं चाचरं
पश्यन् व्याप्तमिदं जगत् किमपि किं नैवाहमालोकये ।।3।।

ज्ञानं मे प्रथितं मया च पठिता ग्रन्था अनेके भुवि
तत्किं मे परवञ्चनादिकृतिषु स्वीया प्रवृत्तिः सदा ।
दीनां दुर्विधतां गतां च जनतां नो वीक्ष्य चित्तद्रुति-
र्मेऽन्धो वा वधिरोऽथवाहमिति मे नैवास्त्यहो निर्णयः ।।4।।

दिव्योऽहं सुविभूषितो गुणगणैर्लोकस्य पूज्यस्तथा
कुर्वन् वैभवशालिभव्यभवने वासं सदर्पं सदा ।
ध्यायन् द्रव्यमुपार्जितं कुधृतिभिर्नैकैस्तथा गर्हितैः
कृत्यैश्छद्मपरैर्नृशंसपरमैः शान्तिं परां नाप्नुवे ।।5।।

आढ्यानामकृतात्मनां बत ! कृते श्राम्यामि रात्रिन्दिवं
नैवाहं च लभे कथञ्चिदपि हा ! स्वीयामभीष्टां भृतिम् ।
हर्म्याणां रचनाविधावनुदिनं [illegible] मे हन्त भो !

वासः पर्णकुटी विशीर्णमलिनं वासो ममाच्छादनम् ।।6।।

आचार्योऽप्यनुशास्मि नैव सततं राज्ञां नयेऽवस्थितो
वैद्योऽहं परमातुरादिविपया चिन्ता न मां बाधते ।
कार्याणां लय इत्यनेन विधिना कार्यालये कार्यकृद्
उत्कोचादिपरः परार्थघटकः सौख्यं परं व्यश्नुवे ।।7।।

कः पन्थाः किमु मे स्वरूपमथवा कस्यास्म्यहं भूतले
किं वा कर्म करोमि कस्य च कृते श्राम्याम्यहं सन्ततम् ।
किं वा वच्मि श्रृणोमि किं किमथवा ध्यायामि यामि क्व च
कोऽहं वेत्ति न वेद्मि हन्त ! किमिति भ्राम्यामि दिग्भ्रान्तवत् ।।8।।

श्रीमती राजलक्ष्मी सिंह 9452025315

महाकविकालिदासाष्टकम्

गङ्गोदधारा इव शुद्धरूपाः
	शशाङ्कलेखा इव कान्तिमत्यः ।
नूत्नार्थविज्ञानविभासयित्र्यः
	श्रीकालिदासस्य गिरो विभान्ति ।। 1 ।।

अंशुप्रकर्षेण यथांऽशुमाली
	हिमातिरेकेण यथा हिमाद्रिः ।
तथा कवित्वस्य भरेण दिव्ये-
	नायं कविप्राग्रहरो विभाति ।। 2 ।।

पुराणमित्येव न साधु सर्वं
	नैवानवद्यं च समस्तमस्ति ।
महाकवेः काव्यकलाविलासे
	पुरातनत्वं च नवीनता च ।। 3 ।।

शब्दार्थसाहित्यमपूर्वमस्य
	काव्येषु पुष्टाश्च रसप्रवाहाः ।
सर्वाञ्जनानुन्मदयन्ति सत्यं
	कुर्वन्ति तांस्तद्वशगान् हठाच्च ।। 4 ।।

''वेगाद्वहन्ती च न चोत्तटा च
	गम्भीरभावा च न चाप्रसादा ।
रसोत्तरङ्गा प्रतिभा विभाति
	महाकवेर्देवतरङ्गिणीव'' ।। 5 ।।

निजाद्वितीयप्रतिभोत्थदीप-
	शिखेव काव्यावलिरस्य दीप्रा ।
सम्प्रापयत्यन्यकवीन्द्रकाव्य-

समूहमत्यन्तविविर्णभावम् ।। 6 ।।

पदावलिं कोमलकान्तरूपां

न्यस्यन् यथास्थानमयं कवीन्द्रः ।

ताञ्चाप्यलङ्कारभरेण युञ्ज-

न्नाभाति काव्यज्ञभराभिजुष्टः ।। 7 ।।

कविप्रवेकेषु लसत्स्वनेके-

ष्वनेन भूमिः सविशेषशोभा ।

''नक्षत्रताराग्रहसङ्कुलाऽपि

ज्योतिष्मती चन्द्रमसैव रात्रिः'' ।। 8 ।।

ओ३म्

मानवता के सन्देश के लिए वेदों एवं श्रीगुरुग्रन्थ साहिब का योगदान

(Role of the Vedas and Shri Guru Grantha Sahib to the message for humanity.)

जर्मनी देश के प्रसिद्ध भारतीय प्राच्य विद्या विशारद प्रो० मैक्समूलर ने अपनी पुस्तक **इण्डिया-ह्वाट कैन इट टीच अस** में एक स्थान पर लिखा है कि ''यदि में विश्वभर में उस देश को खोजने के लिए चारों दिशाओं में आँख उठाकर देखूँ जिस पर प्रकृति देवी ने अपना सम्पूर्ण वैभव, पराक्रम और सौन्दर्य को खुले हाथों से लुटाकर उसे पृथिवी का स्वर्ग बना दिया है, तो मेरी अङ्गुली भारत की ओर उठेगी। अगर मुझसे पूछा जाय कि अन्तरिक्ष में नीचे कौनसा वह स्थान है जहाँ मानव ने अपने हृदय में निहित ईश्वर प्रदत्त अनन्यतम सद्भावों को पूर्ण रूप से विकसित किया है, गहराई में उतरकर जीवन की कठिनतम समस्याओं पर विचार किया है, उनमें से अनेकों को इस प्रकार सुलझाया है, जिसको जानकर प्लेटो तथा काण्ट का अध्ययन करने वाले मनीषी भी आश्चर्यचकित रह जायें, तो मेरी अङ्गुली भारत की तरफ उठेगी और अगर अपने से पूछूँ, कि हम योरोप के वासी जो अब तक केवल ग्रीक, रोमन तथा यहूदी विचारों में पलते रहे हैं, किस साहित्य से प्रेरणा ले सकते हैं जो हमारे भीतरी जीवन का परिशोध करे, उसे उन्नति के पथ पर अग्रसर करे, व्यापक बनाए, सही अर्थों में मानव बनाए, जिससे ध्येय इस पार्थिव जीवन को ही नहीं हमारी सनातन आस्था को शान्ति मिले, तो फिर मेरी अङ्गली भारत की तरफ ही उठेगी।''

जर्मनी के प्रसिद्ध दार्शनिक शोपनहार का कथन था कि विश्व के सम्पूर्ण साहित्य भण्डार में किसी ग्रन्थ का अध्ययन मानव के विकास के लिए इतना हितकर तथा ऊँचा उठाने वाला नहीं जितना उपनिषदों का ~~अध्ययन।~~ इसके अध्ययन से मुझे जीवन में शान्ति मिली है, और इनके अध्ययन से ही मुझे मृत्यु के समय भी शान्ति की प्राप्ति होगी। शोपनहार के इन शब्दों का उल्लेख करते हुए मैक्समूलर ने लिखा है कि अगर शॉपनहार की इस भावना का समर्थन करने की आवश्यकता हो तो दर्शन तथा धर्म के अध्ययन में व्यस्त अपने दीर्घ जीवन के अनुभव के आधार पर इन शब्दों का सहर्ष अनुमोदन करता हूँ।

मैक क्रिंडल ने सिकन्दर के आक्रमणों पर लिखी अपनी पुस्तक में मैगस्थनीज के **इण्डिका** ग्रन्थ का उद्धरण देते हुए लिखा है कि जब सिकन्दर भारत पर आक्रमण करने के लिए निकला तब उसके गुरु अरस्तु ने उसे उपदेश दिया कि वहाँ से लौटते हुए दो तोहफे लेते आना-एक था भगवद्गीता तथा दूसरा वहाँ का कोई सन्त। सिकन्दर जब भारत भूमि से लौटने लगा तब उसने ओनियोक्रोटस नामक अपने प्रतिनिधि को किसी सन्त को ढूँढ़कर साथ ले चलने के लिए भेजा। एक सन्त मिला जिसका नाम ''डैडमीज'' लिखा है, ने साथ चलने से इन्कार कर दिया। **डैडमीज** शब्द दण्डी-स्वामी का ग्रीक रूप प्रतीत होता है, क्योंकि नाम

के साथ ईज लगाना ग्रीक पद्धति रही थी। दण्डी स्वामी को सिकन्दर के दूत ने कहा कि आप चलेंगे तो जुपिटर का पुत्र सिकन्दर आपको मालामाल कर देगा। दण्डी स्वामी ने हंस कर उत्तर दिया-हमारे रहने के लिए यह शस्य-श्यामला भारत की धरती, पहनने के लिए ये वल्कल वस्त्र, पीने के लिए कलकल रव करती गङ्गा की शीतल धारा, खाने के लिए एक पाव आटा बहुत है, हम आत्म धन के धनी हैं, आत्मधन जो धनों का धन है, उस धन की दृष्टि से दरिद्र सिकन्दर हमें क्या दे सकता है।

औरंगजेब का भाई दारा शिकोह उपनिषदों पर इतना लट्टू था कि उपनिषद् विद्याविदों से लगातार छै: महीने तक उसकी व्याख्या सुनता रहा। १६५६ में उसने इनका फारसी में अनुवाद किया। दारा के इसी भाषान्तर को फ्रेंच विद्वान् एन्क्विटिल डयुपैरों ने पढ़ा और इसे पढ़कर उसे प्राच्य शास्त्रों को पढ़ने की रुचि हुई। उपनिषदों के फारसी अनुवाद के आधार पर ही एन्क्विटिल डयुपैरों ने १८०१ में इनका लैटिन में अनुवाद किया। इस प्रकार दारा शिकोह द्वारा मुस्लिम एवं एन्क्विटिल द्वारा ईसाई जगत् में उपनिषदों की विचारधारा का इतना सिक्का जमा कि पूर्व और पश्चिम में इन ग्रन्थों को अत्यन्त श्रद्धा से पढ़ा जाने लगा। अरस्तु, दारा शिकोह, मैक्समूलर तथा शोपनहॉर जिस विचारधारा की तरफ आँख उठाकर देख रहे थे, उसका आदि स्रोत वेद हैं। वेदों की विचारधारा ने भारत की भूमि को ही आप्लावित नहीं किया, अपितु विश्वभर की विचारधाराओं को प्रभावित किया है। यह वैदिक ज्ञान एवं विद्या ही है, जिसने सभी को कुछ दिया है, अपना मार्गदर्शन किया है, यही विचारधारा है जिसकी मौलिकता के आलोक में अन्य ग्रन्थों ने भी मानवजाति को दिव्य गुणों, अध्यात्म, आचार-विचार एवं चरित्र की शिक्षा दी है, उनमें गुरुवाणियों के रूप में निबद्ध अत्यन्त पवित्र ग्रन्थ श्रीगुरुग्रन्थ साहिब प्रमुख है। निश्चय ही परम तपस्वियों गुरुओं की वाणियाँ लोक कल्याण एवं विश्वशान्ति का सन्देश देती हैं।

भारतीय चिन्तन में वेदों को अपौरुषेय, ईश्वर की वाणी तथा सृष्टि के आद्य में आदि ऋषियों के हृदयों में प्रकाशित ज्ञान माना गया है, ये वेद चार हैं-ऋग्वेद, यजुर्वेद, सामवेद एवं अथर्ववेद। चारों वेदों के मन्त्रों की संख्या २० हजार से अधिक है। महर्षि मनु एवं अन्य ऋषियों ने वेद को **वेदोऽखिलो धर्ममूलम्** अर्थात् वेद सभी धर्मों का मूल एवं सभी विद्याओं का भण्डार कहा है। इनको संसार एवं मानव जाति के आदि ग्रन्थ माना गया है। परवर्ती वाङ्मय के विस्तार में इन्हीं का महान् एवं मौलिक योगदान है। वेद , वैदिक संस्कृत भाषा में निबद्ध तथा सैकड़ों ऋषियों के हृदय में परमात्म-प्रेरणास्वरूपत:. प्रकाशित मन्त्रों की राशि के रूप में गुम्फित हैं, वहीं अनेक गुरुओं एवं सन्तों के हृदय में उत्पन्न वाणी के रूप में मूलतः गुरुमुखी में लिखित श्री गुरुग्रन्थ साहिब है, जिसमें गुरुवाणियों को ३१ मिश्रित रागों में प्रमुखता से उच्चारा गया है और प्रत्येक वाणी के आदि में राग का नाम दिया है जैसे सिरी राग, राग माझ, राग गउडी, राग आसा, राग गुजरी आदि। इसके बाद में वाणीकार गुरुओं एवं सन्तों का नाम का क्रमवार सङ्केत महला-१

(गुरु नानक देव) महला-२ (गुरु अङ्गद), महला-३ (गुरु अमर दास) महला-४ (गुरु रामदास) महला-५ (गुरु अर्जुन देव) महला-९ (गुरु तेगबहादुर) दिया है। तत्पश्चात् भक्तवाणी के सन्त का नाम दिया है-जैसे-वाणी-भक्त कबीर, भक्त नामदेव, भक्त रविदास, भक्त त्रिलोचन, सूफी शेख फरीद, सन्त धन्ना, भक्त सधना, भक्त सूरदास, जैदेव, भक्त वेणी, भक्त मीखण, भक्त रामानन्द, भक्त सुन्दर, भक्त परमानन्द, भक्त पीपा, भक्त बलबण्ड सता, भक्त मरदाना, भक्त सैण इत्यादि।

वैदिक वाङ्मय सभी ज्ञान एवं विज्ञान का मूलाधार एवं विश्व संस्कृति का उन्मेषक भण्डार है इसको **या संस्कृतिः सा प्रथमा विश्ववारा** कहा है, धर्म एवं सभ्यता का विशाल साम्राज्य वेद की आधारभूमि पर ही विकसित हुआ है। वस्तुतः वेद सम्पूर्ण मानवजाति के लिए एक शाश्वत् संविधान एवं आचार संहिता हैं। वेदों के प्रसिद्ध भाष्यकार आचार्य सायण का कहना है कि इष्ट की प्राप्ति और अनिष्ट का परिहार करना वेद का नैसर्गिक सन्देश है।[1] दूससे शब्दों में कहा जा सकता है कि वेद उन्नति और प्रगति का मार्ग बताता है तथा दुष्कर्मों से होने वाले कुपरिणामों से सतत् निवृत्ति की प्रेरणा देता रहता है। वेद के इन अलौकिक रहस्यों, ज्ञान एवं पराविद्या को पश्चाद्वर्ती वाङ्मय यथा-ब्राह्मण ग्रन्थों, आरण्यकों, उपनिषदों, धर्मसूत्रों, रामायण, महाभारत, महाकाव्यों एवं समय-समय पर हुए दिव्य सन्तों एवं धर्मगुरुओं ने अपने शब्दों में व्याख्यायित किया है। वेद की उक्त परम्पराओं ने पुरुषार्थ चतुष्टय पर बल दिया है तथा उनके सन्देश का अन्तिम लक्ष्य सांसारिक प्रलोभनों को त्यागकर वास्तविक सत्य का अन्वेषण करना अर्थात् **सा विद्या या विमुक्तये** रहा है। वेद, ऋषियों एवं सन्तों के चिन्तन की परम्परा में ज्ञान का उद्देश्य निःश्रेयस का अधिक है। अन्धकार से प्रकाश की ओर, असत्य से सत्य की ओर, मृत्यु से अमृत की ओर जाने पर बल दिया गया है।[2]

मानव एक बुद्धिजीवी प्राणी है और बुद्धितत्त्व की कामना वेद में बहुशः करता है,[3] वहीं वेद ने उसे मानव होते हुए भी सच्चे अर्थों में मानव बनने एवं दिव्य गुणों के धारण करने की धारणाओं से अवगत कराना आवश्यक समझा है।[4] मानव के जीवन में पदे-पदे अनेकानेक विघ्न बाधाओं के फलस्वरूप मानवीय मूल्यों के गिरने की सम्भावना बनी रहती है इसलिए सतत् सावधानी बरतने की दृष्टि से उसे वेद ने **मनुर्भव** का उपदेश दिया है, यहीं मानव को अत्यधिक उदात्त मूल्यों के संरक्षण एवं वर्धन की बात कही है, इन्हीं को लक्ष्य कर वेद ने उदात्त मानवीय मूल्यों के आश्रय में रहकर जीवन जीने की चर्चा की है इन्हीं मानवीय

---

[1] इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकमुपायं यो ग्रन्थो वेदयति सः वेदः।। तैत्ति० सं०सा० भाष्य०।।

[2] असतो मा सद्गमय तमसो मा ज्योतिर्गमय मृत्योर्मामृतं गमय। बृहद्० उप०१.३.१८

अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते। यजु ४०.१४

[3] भूर्भूवः स्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात्।। ऋग्०३.६२.१०, यजु०३६.३।।

यां मेधां देवगणाः पितरश्चोपासते। तया मामद्य मेधयाग्ने मेधाविनं कुरु।। यजु०३२/१४।।

[4] मनुर्भव जनया दैव्यं जनम्। ऋग्० १०/३/६।।

मूल्यों का सटीक स्वरूप श्रीगुरुग्रन्थ साहिब में सरल, सरस, हृदयग्राह्य एवं लौकिकभाषा में प्रस्तुत किया गया है।

उक्त पवित्र ग्रन्थों में संक्षेप एवं कहीं कहीं विस्तार से धर्म-अर्थ-काम-मोक्ष आदि के पर्यालोक में अध्यात्म, नैतिकता, आचार संहिता, सन्मार्गगामिता, विधि-निषेध का ज्ञान, लौकिक एवं पारलौकिक उत्कर्ष, मर्यादा पालन इत्यादि का सारगर्भित प्रतिपादन है। वैदिक वाङ्मय ने बिना किसी जाति, धर्म, देश के भेदभाव के एक सामान्य धर्म निर्वहन, कर्त्तव्यपालन एवं मानवीय गुणों को धारण करने का उल्लेख किया है और यही सर्वसामान्यजन हिताय श्रीगुरुग्रन्थ साहिब में बड़ी सरल, सरस, शब्दावली में सुदृढ़ता के साथ सुन्दर वर्णित लिखा गया है।

पारिवारिक आदर्श-मानव जीवन की एक सर्वाधिक प्रमुख इकाई है परिवार। प्रत्येक सदस्य परस्पर आजीवन जुड़ा रहता है, उनके लिए प्रशस्त आदर्श का सन्देश अथर्ववेद देता है कि प्रत्येक का कर्त्तव्य है कि अपने माता-पिता के प्रति स्वस्तिमय सद्भाव का आचरण करे, कदापि उनकी उपेक्षा न करता हुआ उन्हें सदैव सत्कृत एवं सन्तुष्ट रखें।[५] वेद की यह शिक्षा सुतराम् धारणीय होनी चाहिए कि जन्मोपरान्त बचपन में माता-पिता को कष्ट पहुँचाता हुआ मैं स्वयं अत्यन्त प्रमुदित रहा तो मुझे चाहिए कि वे शिथिल हो चले हैं उनको कदापि किसी भी रूप में पीड़ित न करता हुआ उनकी सदा सेवा एवं सत्कार में रहकर प्रसन्नतापूर्वक उनके ऋण से उऋण होऊँ[६]। इसी दिशा में पारिवारिक सदस्यों को वेदोक्त आचार संहिता का व्यवहार में आचरणीय बताया है कि पुत्र पिता के अनुकूल कर्त्तव्यनिष्ठ होवे, माता के साथ श्रद्धायुक्त मनवाला रहे, पत्नी पति के प्रति मधुर, शान्तिमयी वाणी का व्यवहार करे, भाई-भाई के प्रति द्वेष ना करे, बहिन-बहिन के साथ प्रेम के साथ व्यवहार करें तथा अन्य सभी परस्पर प्रेम एवं सद्भाव रखें[७]। इससे पूर्व अथर्ववेद ने स्पष्ट सन्देश दिया है कि परम सत्ता की ओर से सभी सदस्यों का हृदय परस्पर प्रेम एवं सद्भाव वाला बनाया गया है, इसलिए परस्पर एक-दूसरे को सभी तरह से चाहो जैसे गौ अपने सद्योजात अभिनव बछड़े के प्रति अत्यन्त स्नेह रखती है, वैसे तुम भी सब परस्पर छल कपट, द्वेष से सर्वथा रहित होकर विशुद्ध स्नेह से युक्त

---

[५] स्वस्ति मात्र उत पित्रो नो अस्तु। अथर्व० १.३१.४॥

[६] यदापिवेष मातरं पुत्रः भवतु प्रमुदितो धयन्।
एतत्तदग्ने अनृणो भवाम्यहतौ पितरौ मया॥ यजु०१९.११

[७] अनुव्रतः पितुः पुत्रो मात्रा भवतु संमना।
जाया पत्ये मधुमतीं वाचं वदतु शान्तिवाम्॥
मा भ्राता भ्रातरं द्विक्षन् मा स्वसारमुत स्वसा।
सम्यञ्चः सव्रता भूत्वा वाचं वदतु भद्रया। अथर्व० ३.३०.२-३

आनन्दित रहो।[८] श्रीगुरुग्रन्थ साहिब एवं सभी सन्तों की वाणियों से यही ध्वनित होता है कि सुखी संसार एवं जीवन का मेरुदण्ड सुखी परिवार एवं गृहस्थ है जहाँ परस्पर प्रेम, स्नेह, मधुर व्यवहार एवं बड़ों का सम्मान हो, यही सुखी परिवार के लक्षण हैं।

पुण्यमयी एवं भद्रा लक्ष्मी प्राप्ति-सन्देश- वेद अन्याय, अनीति, रिश्वत अथवा बिना परिश्रम एवं किसी को कष्ट देकर अर्जित लक्ष्मी अर्थात् धन मानव को विनाशकारी, समाज में संघर्षकारी एवं पापकारी बनाता है। श्रम, धर्मयुक्त उपायों, तथा दूसरों को बिना कष्ट पहुँचाए अर्जित, लक्ष्मी की वेद प्रशंसा करता है और मानव के लिए यह कहते हुए चेताता है कि जिस प्रकार वन्दना (अमरबेल) नामक लता हरे-भरे वृक्ष को पनपने नहीं देती, शोषण करती है उसी प्रकार भ्रष्ट तरीके से अर्जित लक्ष्मी दुर्गतिकारिणी एवं धर्म व नीति से भ्रष्ट करने वाली होती है। वेदों में दोषपूर्ण लक्ष्मी से सदा दूर रहने का परामर्श दिया गया है।[९] पुण्यार्जित लक्ष्मी में रमण करने से अत्यन्त सुख शान्ति मिलती है तथा पापमय साधनों से अर्जित कुलक्ष्मी उसी मनुष्य को सकुल बार-बार नाश करती है, **अनीनशम्** आख्यात पद बार-बार नाश करने की ओर इङ्गित करता है। ऐसी पापमयी लक्ष्मी को घर से दूर चले जाने एवं दूर रहने की प्रार्थना की गई है।[१०] श्री गुरुग्रन्थ साहिब में श्री गुरुनानक की वाणी का सन्देश वेदोक्तभाव का अक्षरशः समर्थक है। उनका कहना है कि मनुष्य पवित्रता से जीविकोपार्जन तो करे ही, साथ ही उसी पुण्यार्जित धन से दूसरे लोगों को दानादि देकर सहायता भी करे, वही व्यक्ति वास्तविक मार्ग का पथिक बताया है।[११] गुरुनानक यहीं नहीं रुकंते वे सन्देश देते हैं कि जो प्रभुनामस्मरण के साथ-साथ, परिश्रमशील हैं, उनके मुख उज्ज्वल होते हैं और स्वयं तथा दूसरों को भी मुक्ति के आदर्श बनते हैं।[१२]

दुराचरण निवारण ही मानवता का बहुमुखी विकास-वेद का दृढ़ सन्देश है कि मानव जब तक दुराचरण व दुर्व्यसनों को तिलाञ्जलि नहीं देता तब तक सच्चे अर्थों में उसके मानवीय गुणों का विकास होना नितान्त असम्भव है। गुरु नानकदेव की इस सम्बन्ध में एक पवित्र वाणी का उल्लेख मिलता है जिसमें उन्होंने

---

[८] सहृदयं सांमनस्यमविद्वेषं कृणोमि वः।
अन्यो अन्यमभि हर्यत वत्सं जातमिवाघ्नया। अथर्व०३.३०.१

[९] या मा लक्ष्मीः पतयालूरजुष्टाभिचस्कन्द वन्दनेव वृक्षम्।
अन्यत्रास्मात् सवितस्तामितो धा हिरण्यहस्तो वसु नो रराणः॥ अथर्व०७.११५.२॥

[१०] रमन्तां पुण्यां लक्ष्मीर्याः पापीस्ता अनीनशम्। अथर्व० ७.११५.४॥
प्र पतेतः पाप लक्ष्मि नश्येतः प्रामुतः पत॥ अथर्व० ७.११५.१॥

[११] घालि खाई किछु हथहु देइ। नानक राहु पछाणहि सेइ॥ श्री गु०ग्र०सा०पृ०-६९६॥

[१२] जिनी नामु धिआइआ गये मसकति घालि।
नानक ते मुख उजले केती छुटी नालि॥

धर्म के मार्ग पर चलने वालों को कुकर्मों से सर्वथा सर्वथा के लिए तिलाञ्जलि देने का उपदेश किया है। ऐसा सुकृतकर्मी ही ईश्वर का ध्यान कर सकता है।[१३] इन दुर्व्यसनों एवं दुराचरणों के फलस्वरूप मनुष्य का अन्त:स्थल पशुता व दानवीय दुर्गुणों का भण्डार बन जाता है, जिससे अभिलम्ब ही छुटकारा पाये यह ऋग्वेद का कहना है।[१४] इसलिए मानवीय गुणों के विकास के लिए जाग्रत अथवा सुप्तावस्था अथवा ज्ञाताज्ञातावस्था में बुरे संस्कारों, दुष्टप्रवृत्तियों एवं दुष्टाचरणों को जीवन में स्थान कथमपि न देना परम आवश्यक है।[१५] गुरु नानकदेव की दृष्टि में काम, क्रोध, लोभ, मोह, अहङ्कार इत्यादि दुर्गुण मनुष्य की मनुष्यता को भ्रष्ट कर देते हैं इसलिए उनका मत है पढ़ने, शिक्षा लेने के उपरान्त भी लोभ, अहङ्कार में लिप्त एवं लिप्यायमान है वह पढ़ा हुआ मूर्ख ही है अर्थात् अपने आचार-विचार से भ्रष्ट है।[१६]

सुखी जीवन में माधुर्य का प्रातिष्ठ्य- मानवीय जीवन के सौन्दर्य में मधुरता की अहं भूमिका को वेद ने रेखाङ्कित किया है। मधुरता का अभिप्राय सहजता, नैसर्गिकता, सरलता एवं मधुर वाक् प्रयोग है। जीवन के उत्कर्ष एवं आनन्द में इन गुणों की अत्यन्त प्रतिष्ठा है। मधुर वाणी प्रयोग का उद्देश्य दु:खों से रक्षा करना माना जाता है। बनावटी जीवन, कर्कश व्यवहार एवं कठोर वाणी का प्रयोग वस्तुत: सामाजिक अथवा वैधानिक दृष्टि से विशेष दोष या अपराध न होने पर भी नैतिक दृष्टि से अपराध माना जाता है। ऋग्वेद ने कर्कश व्यवहारकर्त्ता एवं कठोर वाक् प्रयोग करने वालों की निन्दा करते हुए गर्हित व्यक्ति कहा है[१७] जैसा जीवन वैसा मरण यह सामान्य नियम है। जीवन की मधुरता अथवा कटुता क्रमश: निर्भर करती है मधुर अथवा वाग्व्यवहार पर। अत: मानवीय जीवन अच्छा, मधुर एवं सुखकारी हो एतदर्थ अथर्ववेद में मधुरता का उल्लेख उदात्तभाव से मिलता है।[१८] वहीं परस्पर मधुर सम्भाषण करने, वृद्धों का मधुरता से सम्मान

---

[१३] सेव कीती संतोखीईं जिन्हीं सचु धिआइआ।
ओन्हीं मन्दै पैरु न रखिओ करि सुकृतु धरमु कमाइआ।। श्रीगु०ग्र०सा०पृ०२८४॥

[१४] श्रेष्ठो जातस्य रुद्र श्रियासि तवस्तमस्तवसां वज्रबाहो।
पर्षि ण: पारमंहस: स्वस्ति विश्वा अभीति रपसो युयोधि॥ ऋग्०२.३३.३॥

[१५] यदाशसा नि:शसाभिशसोपारिम जाग्रतो यत् स्वपन्त:।
अग्निर्विश्वान्यप दुष्कृतान्यजुष्टान्यारे अस्मद् दधातु॥ ऋग्० १०.१६४.३॥

[१६] पड़िया मूरख आखिए जिसु लबु लोभु अहंकारा।। श्रीगु०ग्र०सा०पृ०-१०८॥

[१७] इन्द्राग्नी अवसा गतमस्यभ्यं चर्षणीसहा।
मा नो दु:शंस: ईशत।। ऋग्०७.९४.७

[१८] जिह्वाया अग्रे मधु मे जिह्वामूले मधूलकम्।
ममेदह क्रतावसो मम चित्तमुपायसि॥
मधुमन्मे निक्रमणं मधुमन्मे परायणम्।
वाचा वदामि मधुमत् भूयासं मधुसन्दृशम्॥ अथर्व० १.३४.२-३॥

करने, सुविचारशीलों को एकमत होने पर पर्याप्त बल दिया है।[१९] किसी को दुःख पहुँचाने वाला कठोर वचन न बोलना ही वचन की अपवित्रता है। बहु, व्यर्थ या अनर्गलभाषण भी वचन की अपवित्रता है, अतः वचनों में शुचिता एवं परनिन्दा का परिहार आवश्यक है इसलिए परनिन्दा गुरुनानक देव के मत में अत्यन्त गर्ह्य एवं मलस्वरूप[२०] है। उन्होंने परनिन्दा एवं वाक्पारुष्य को बन्धन का कारण एवं पतनोन्मुखी करार दिया है।[२१]

द्वेष रहितता, मित्रभाव एवं विश्वबन्धुत्व- वैदिक मान्यतानुसार इस संसार में सभी को समानाधिकार, समभाव एवं परस्पर सङ्गठनात्मक प्रवृत्ति पर बल दिया है। सभी को समान अवसर एवं मातृभाव मिले तो इस सङ्गठनात्मक दृष्टि से सभी को न्याय मिलता है।[२२] वेद ने तो स्पष्ट संकेत दिया है कि प्रत्येक मानव का अन्न, जल इत्यादि प्राकृतिक भोग्य पदार्थों पर समान अधिकार है तथा तुम सभी इसी तरह सङ्गठित रहें जैसे रथ के पहिए के अरे एक केन्द्र में स्थित रहते हैं। निश्चय ही यहाँ सह-अस्तित्व की अवधारणा मानव के लिए आवश्यक बताई गई है।[२३] सभी मिलकर अभ्युदयकारक अच्छे सत्य-हित-प्रिय वाक्यों को ही बोलें तथा सभी के मन, सुख, दुःखादिरूप भाव को सबके लिए समानरूप से जानें। परस्पर अलगावभाव या विरोध मानव विरोधी आचरण है। सभी के हृदय सङ्कल्प, मन, निश्चय, प्रयत्न समान समभाव वाले हों, यह मानव के लिए सन्देश वेद में पहले से ही निर्धारित कर दिया गया है।[२४] वेद में द्वेष को ऐसा मानवीय दुर्गुण कहा है जिससे सिवाय शत्रुता के कुछ भी प्राप्त नहीं होता, इसलिए अथर्ववेदीय

---

[१९] ज्यायस्वन्तश्चित्तिनो मा वियौष्ट संराधयन्तः सधुराश्चरन्तः।
अन्यो अन्यस्मै वल्गु वदन्त एत सध्रीचीनान्वः संमनसस्कृणोमि॥ अथर्व०३.१३.५॥

[२०] परनिन्दा पर मलु मुख सुधी अगनि क्रोध चंडालु। श्रीगु०ग्र०सा०पृ०२६॥

[२१] वाधे मुकति नाही न निन्दक डूबहिं निंद पराई हे। श्रीगु०ग्र०सा०पृ०५८२॥

[२२] स वः पृच्यन्तां तन्वः सं मनांसि समुव्रता।
स वोऽयं ब्रह्मणस्पतिर्भगः सं वो अजीगमत्। अथर्व०६.७४.१

[२३] समानी प्रपा सह वोऽन्नभागः समाने योक्त्रे सह वो युनज्मि।
सम्यञ्चोऽग्निं सपर्यतारा नाभिमिवाभितः।। अथर्व०३.३०.६

[२४] संगच्छध्वं संवदध्वं सं वो मनांसि जानताम्।
देवा भागं यथा पूर्वे सञ्जानाना उपासते॥ ऋग्०१.१९१.२॥
मा वियोष्ट अन्यो अन्यस्मै वल्गु वदन्त। अथर्व०३.३०.४
समानी व आकूतिः समाना हृदयानि वः।
समानमस्तु वो मनो यथा वः सुसहासति।। ऋग्०१०.१९१.४
समानो मन्त्रः समितिः समानी मनः सह चित्तमेषाम्।
समानं मन्त्रमभिमन्त्रये वः समानेन वो हविषा जुहोमि॥ ऋग्०१०.१९१.२

मनसा परिक्रमा के मन्त्रों में द्वेष की प्रवृत्ति को प्रभु की न्याय व्यवस्था में रखने की बात कही है।[२५] यजुर्वेद
